Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# अथचंडकौशिकनाटकप्रारंभः

For Private and Personal Use Only



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगणेशायनमः देवस्त्रैगुण्यभेदात्सृजतिवितनुतेसंहरत्येवलोकानस्यैवव्यापिनीभिस्तनुभिरपिजगद्व्यासमष्टाभिरेव वंद्योना
स्येतिपश्यन्निवच्चरणगतः पातुपुष्पांजलिर्वः शंभोर्नृत्यावतारेवलयफणिफणाफूत्कृतैर्विप्रकीर्णः १ अपिच अरुणनयनंसभ्रू
भंगंदरस्फुरिताधरंसतनुशशिनःक्लिष्टांकांतिकरोतुनवाननं कृतमनुनयैःकोपोऽयंते मनस्विनिवर्धनामितिगदितयाश्लिष्टोदे
व्याशिवायशिवोऽस्तुवः २ अपिच आनंदश्लथिताःसमाधिषुसुखवेगोर्याविलासोल्लसाःसंभ्रांताःक्षणमद्भुताःक्षणमथस्मेरा-
निजेवेक्षते क्रूराःकृष्टशरासनेमनसिजेदग्धेघृणाकूणितास्तत्कांतारुदितेऽश्रुपूरतरलाःशंभोर्दृशःपांतुवः ३ नांद्यंतेसूत्रधारः अ
लमतिविस्तरेण आदिष्टोऽस्मिअष्टामात्यबुद्धिवागुरालब्धसिंहरहसात्कूमंगलीलासमुत्खातशेषकंटकेनसमरसागरांतर्भ्रमद्भुजदंड
मंदराकृष्टलक्ष्मीस्वयंवरप्रणयिनाश्रीमहीपालदेवेनयस्यैमांपुराविदःप्रशस्तिगाथामुदाहरंति यःसंश्रित्यप्रकृतिगहनामार्यचाण-
क्यनीतिंजित्वानंदान्कुसुमनगरंचंद्रगुप्तोजिगाय कर्णाटत्वंध्रुवमुपगतानद्यतानेवहंतुंदोर्दर्पाढ्यःसपुनरभवच्छ्रीमहीपालदेवः
४ अज्जकिंउणतेणास्यणासंमादिट्ठं, सूत्रधारः इदमादिष्टं यथाकिलविजयप्रकोष्टप्रणसुःकवेरार्यक्षेमीश्वरस्यकृतिरभि-
नवंचंडकौशिकंनामनाटकंनाटयितव्यम् सकिलकविर्नाट्यवेदविशारदान् विद्याकलाविदोलोकज्ञान्सभासदः प्रत्येकमुक्तवान्
दृष्टंकिमपिलोकेस्मिन्ननिर्दोषंननिर्गुणं आवृणुध्वमतोदोषान्विवृणुध्वंगुणान्बुधाः ५ नत्वारिपार्श्वकर्किमितिनारभ्यासिकुशी-
लवैःसहसंगीतं पारिपार्श्वकः- साशंकंअधोमुखंस्थित्वा क्षणादुअज्जोनदागहोवराएजस्सादिअवरस्स अज्जेणदाक्खिणा-

१ आर्यकिंपुनस्तेनप्रज्ञासमादिष्टं २ शृणोत्वार्यस्तदाग्रहोपरागेयस्यद्विजवर[illegible]आर्येणदाक्षिणा

For Private and Personal Use Only

पडिण्णादासोदाणिंताण्णिमित्तंपडिकुविदोत्तिसअलोज्जेवकुशीलवुजणोपज्जाउलो, सूत्र० प्रथमभिनीय चिंतांनाटयित्वा सहर्ष
मारिषअलमत्रपर्याकुलतया अयमहमिदानींददामिपालयन् सत्यंब्राह्मणायप्रतिश्रुतं हरिश्चंद्रइवाद्येकपुत्रदारात्मविक्रयात् ६ ने-
पथ्ये- एंदु २ पिअवअस्सो, सू० नेपथ्याभिमुखमवलोक्य अयेकथमसोदेवोहरिश्चंद्रः महोत्पातसूचितानामापदांकुशलपरिणामा
यप्रारब्धविविधविधिविस्तरेणपुरोधसानिभृतोपदिष्टनियमोजागरावसानदुर्मनाः प्रियवयस्यबोधायनोपदिश्यमानवर्त्मांशकुंतमभिप्र
स्थितएव यएषः निद्राविधेयारुणमंथराक्षःप्रजागरक्षामसुखांबुजश्रीः सद्योवियोगव्यथितोदिनांतेभ्रष्टःस्वयूथादुपसीवनागः ७
तदेहितत्रैवगच्छावइतिनिष्क्रांतौ प्रस्तावना ततःप्रविशतिजागरखेदंनाटयन्राजाविदूषकश्च विदूषकः- [1]भोवअस्सपजाअरमं-
थरेहिंलोअणेहिंदरुग्गिण्णसुहोविअकुम्मोउम्मेसणिमेसाइंकरेंतोविमग्गंअणवेरवंतं तोअंधमूसओविअइदोतदोपरिब्भमासि,
राजा- वयस्यनिद्राहिनामप्राणिनांप्रथममिदंशरीरधारणनिमित्तं कुतः चित्तंप्रसादयतिलाघवमादधातिप्रत्यंगमुज्ज्वलयतिप्रतिभा
विशेषं दोषानुदस्यतिकरोतिचधातुसाम्यमानंदमर्पयतियोगविशेषगम्यं ८ तन्ममापीदानींपश्य निद्रालसंभंगमुपैतिगात्रंखेदाति
भारक्लमितंमनश्च मुहुर्मुहुर्वक्रमुपैतिजृंभांबालातपालोकसहानदृष्टिः ९ विचिंत्यसविस्मयं कःपुनरद्यनिशाप्रजागरमादिशतो-
भगवतःकुलपतेरभिप्रायःसंवृत्तः अथवानविचारमर्हंतिगुरुशासनानि विदू० [3]भोवअस्सअहंउणाचिंतअंतोवासकसज्जाएदेवीए

प्रतिज्ञातासइदानींतन्निमित्तंपरिकुपितइतिसकलएवकुशीलवजनःपर्याकुलः १ एहितेतुप्रियवयस्यः, २भोवयस्यप्रजागरमंथरैर्लोचनैःदरोद्गीर्णसुखइ-
वकूर्मउन्मेषनिमेषान्कुर्वन्नपिमार्गमनवेक्षन्नंधमूषकइवेतस्ततःपरिभ्रमसि, ३ भोवयस्यअहंपुनश्चिंतयन्वासकसज्जायादेव्याः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खंडणाणत्थादोअण्णंणकिंपिपेक्खामि, राजा– वयस्यालंपरिहासेन विदू॰ [1]भोतवउणएसोपरिहासोममउणअणाहवडुअस्स-
अणत्थोजेव्व, राजा– सोत्कंठं आशंकांनाटयित्वा वयस्यकथंपुनरवगच्छसिकिंप्रतिपत्स्यतेदेवीति विदू॰ पेरिकुविदेतितक्केमि, रा
जा– वयस्यएवमेतत्कःसंदेहः नाल्पमिदंकोपकारणंदेव्याः तथाहि किंरुद्धःसाचिवैरथप्रणयिनांगोष्ठीरसेनाहृतः किंवाकामपिवल्ल
भामभिसृतोधूर्तोघनायात्यसौ इत्थंकोपकषायलोचनगलद्बाष्पांबुधौताननंनिःश्वस्यप्रिययाशठेमयितयाकिंकिंन्नसंभावितं १०
अपिच लीलासंभृतमंडनोत्करतयानीतःप्रदोषस्तयामन्मार्गार्पितनेत्रयाचगामिनोयामस्तथैवापरः नायातःशठइत्यकदश्रुविकलं-
व्याधूयभूषाविधिंशय्योपांतविवर्तनैरथनिशाशेषःकथंयापितः ११ चिंतांनाटयित्वा अहह नूनमसौनतप्रसूः अभिपततिजूनेमदा
गमाशाविहितवृथोद्यमसंभ्रमातदानीं कृतानिभृतपरस्परस्मितासुस्थगितमुखीषुसखीषुनम्रमासीन् १२ विदू॰– सहासं भोवअस्स
किं[illegible]गंअदिक्कंतमणुसोअंतोअत्ताणंआआसेसिता एहितहिंज्जेव्वगदुअदेवींपसादेह्म, राजा सश्लाघं सम्यगाहभवान् तदेहितत्रैवग
च्छावइतिपरिक्रामतः राजा सखेदंनिःश्वस्य इदानींप्रष्टावसरस्यखेदकारणंगमनं तथाहि विच्छिन्नामनुबध्नतीममकथांमन्मा-
र्गदत्तेक्षणामन्वानासुमुखीचलत्यपितृणेमामागतंसामया नाश्लिष्टायदलक्षितेननिभृतंपश्चादुपेत्यादराद्यत्तस्यानवनीलनीरजनिभेरु
द्धेकराभ्यांदृशौ १३ विदू॰ परिक्रम्यनेपथ्याभिमुखमवलोक्य सश्लाघं भोवअस्सपेक्खव २ एसाखुदेवीउवणीदपसाहणोवअरणा-
एचारुमदीएसहकिंपिमंतअंतीउवविट्ठाचिट्ठदि, राजा दृष्ट्वासहर्षं अयेकथं तन्वंग्याशरगौरयोःपरिहृतापत्रावलीगंडयोःकर्णोता

खंडनानर्थादन्यत्किमपिप्रेक्षामि, १भोतवपुनरेषपरिहासोममपुनरनाथबटुकस्यानर्थएव, २परिकुपितेतितर्कयामि, ३भोवयस्यकिंत्वमतिक्रांतमनुशो
चन्नात्मानमायासयसितदेहितत्रैवगत्वादेवींप्रसादयावः, ४भोवयस्यप्रेक्षस्व २ एषाखलुदेवीउपनीतप्रसाधनोपकरणाचारुमत्यासहकिमपिमंत्रयंतीउपविष्टा
तिष्ठति

यत्तयोर्नवाभृगद्दशादनंदृशोरंजनं व्यालोलाकबरीनिसर्गकुटिलाबिंबाधरोधूसरश्चित्रंसैवतथापिकांतिरनघाहेश्वीवयामंडनं १४
ततःप्रविशतियथानिर्दिष्टाचिंतांनाटयंतीशैब्याचारुमतीच चारुम॰ भट्टिणिएदंपसाहणोवअरणं, शैब्या सखेदं हंजेचा-
रुमदिएअवणेहिएदंणिप्फलप्पसाहणोवअरणासत्तहिअआएकिंनिअंदाणिंमएअप्पापरिभाविदव्वो, विदू॰ अहोसेगरुओअहिणि
वेसो, राजा– साधुदेविसाधुपरिभवस्थानमेषतेप्रसाधनाभिनिवेशोनिसर्गमधुराणामंगानां तथाहि तांबूलरागोधरस्थोलुपोयद्वदंज
नंलोचनचुंबनोत्सुकं हारश्चकंठग्रहलालसोयत्स्वार्थःसतेषांनतुभूषणंते १५ विदू॰ भोवअस्सउवस्सप्पह्म, राजा वयस्यइ-
तोंतर्हितौशृणुवस्तावदस्याविश्रंभजल्पितानि इतितथास्थितौ शैब्या निःश्वस्य सास्रं हंजेचारुमदितधासमासासिअअज्जउत्तो
मं[illegible]प्पलंभगोअरंकरेदित्तिसव्वधाणमोणमोअवीससणीआणंअत्तणोभाअधेआणं, राजा अयिमनस्विनि जलधरपटलांतरिते-
यदिभानोरखंडनुंगतानालिनी तस्यानविप्रलंभोनोपालंभोप्ययंभानोः १६, चारुमती भट्टिनिअलंसंतावेदिणबहुवल्लहाखुराआ
णो, विदू॰ आःदासीएधीएणंबहुकुज्जातिमणोहिकिंअलिओवालंभगोअरंपिअवअस्संकरेसि, राजा वयस्यअलमत्रक्रोधेन मा
नग्रंथोविधिज्ञाभिःसखीभिरुपदिष्टाहिते धन्याःप्रयांतिकांतानांमिथ्योपालंभपात्रतां १७ शैब्या रोदिति चारुमती भट्टिणिस-

१ भट्टिणिइदंप्रसाधनोपकरणं, २ हंजेचारुमतिअपनयेदंनिष्फलप्रसाधनोपकरणासक्तहृदययाकियदिदानींमयाआत्मापरिभावितव्यः, ३ अहोअस्यागुरुर-
भिनिवेशः, ४ भोवयस्यउपसर्पावः, ५ हंजेचारुमतितथासमाश्वास्यआर्यपुत्रोमांविप्रलंभगोचरांकरोतीतिसर्वथानमोनमअविश्वसनीयेभ्योनामात्मनोभागधे-
येभ्यः, ६ भट्टिनिअलंसंतापितेनबहुवल्लभाःखलुराजानः, ७ आःदास्याः धियानकुब्जतीमणासिकिमलीकोपालंभगोचरंप्रियवयस्यंकरोषि, ८ भट्टिनिस-

मस्सस २ णंअदिमेत्तंमहाणुभावदाएतु एजेव्वअदिभूमिंणीदोमहाराओताजइमंपुच्छसिनदोपलोअंतोवियापलोइदव्वोपिअंआलवं तोविचिरंउवालंभेहिंखेवेदइदव्वो, शैब्या [1]किंनिदेवअणंणकरिस्सं जइदिट्ठेअज्जउत्तेएदस्सदुट्ठहिअअस्सपहविस्सं, राजा सत्वरमुपसृत्य प्रिये मयियस्याःप्रभावस्तेहृदयेमत्परायणे त्वमात्मनोविशालाक्षिकथंनप्रभविष्यसि १८ विदू० [2]सोत्थिभोदीए, उभे ससंभ्रममुपतिष्ठतः शैब्या स्वगतं [3]कधंअज्जउत्तोभोदुएवंदाव, प्रकाशं [4]जअदु २ अज्जउत्तो, चारु० साशंकमात्मगतं [5]कधंमहाराओहद्धी २ सुदंमहाराएणजंमएमंतिदंभोदुएवंदाव, प्रकाशं [6]जअदु २ महाराओ, आसनमुपनीय [7]एदंआसणंएत्थउववसिदु महाराओ, इतिसर्वेउपविशंति राजा चिरंनिर्वर्ण्य प्रियेनन्वियमिदानींते किमपांगवलिततारानिवर्ततेमयिवरांगिनिपतंती प्रातः सरोजगर्भेभ्रमरीवापिपासिताहृष्टिः १९ अपिच तन्वंगि यद्यपिश्रियमाधत्तेभूषणानादरस्तव तथाप्यंतर्गतंमन्युमयंकथयतीवमे २० शैब्या सासूयमवलोक्य. [8]सुहुसोहदिअज्जउत्तोइमेहिंणिद्दालसेहिंउज्जाअरमंथरेहिंसोणालोअणेहिं, इतिकोपंन्नाटयति राजा चिरंनिर्वर्ण्यसानुनयंप्रियेप्रसीद २ परिलुठतिललाटेभंगुराभ्रूलताकिंमदनजयपताकाविभ्रमंबिभ्रतीयं स्फुरतिचकिमकांडेचांडिबिंबाधरोयंमृदुपवनविधूतोन्निद्रबंधूकबंधुः २१ अंजलिंबध्वा चंडिप्रसीदपरिकुप्यसिकिंमुधैवनाहंतथानतुयथापरिशंकसे-

माश्वस २ ननुअतिमात्रंमहानुभावतायास्त्वयैवातिभूमिंनीतोमहाराजस्तद्यदिमांपृच्छसितदामलोकन्नापिनप्रलोकितव्यः प्रियमालपन्नापिचिरंमुपालंभैः खेदयितव्यः, १ किमितिनेवचनंनकरिष्यामियदिदृष्टेआर्यपुत्रेएतस्यदुष्टहृदयस्यप्रभविष्यामि, २ स्वस्तिभवत्यै, ३ कथमार्यपुत्रःभवत्वेवंतावत्, ४ जयतु २ आर्यपुत्रः, ५ कथंमहाराजःहाधिक् २ श्रुतंमहाराजेनयन्मयामंत्रितंभवत्वेवंतावत्, ६ जयतु २ महाराजः, ७ इदमासनमस्मिन्नुपविशतुमहाराजः, ८ सुष्टुशोभतेआर्यपुत्रः एभिर्निद्रालसैरुज्जागरमंथरैः शोणलोचनैः,

मां दंडंवरांगिमयिधारयक्षमंतेमान्निर्णयेकुलपतिर्भगवान्प्रमाणं २२ प्रविश्यप्रतीहारी [1]जंअदु[2]महाराओएसोकुलवदिसआ-
सादोतापसोपउत्तो, राजा हेमप्रभेसादरमविलंबंप्रवेशयप्रतीहारी [3]जंमहाराओआणवेदित्ति, ततः प्रविशतिशांत्युदकहस्तस्ता
पसः तापसः अहोनुखलुभोःअपर्वण्येवेंदोःकिमयमुपरागः कथमयंदिशांदाहोघोरःकिमितिवसुधेयंप्रचलिता छिनत्फल्का
दंडःकिमितिसवितुर्मंडलमहोमहोत्पातोदर्कःकइवपरिणामोहतविधेः २३ अथवा गुरुभिरनुचिंत्यमानंसर्वमेवैतत्कुशलपरि-
णामं शांतेःस्वस्त्ययनाद्दानाद्द्विजाग्र्यांसस्लिवाचनात् दुःस्वप्नोत्पातशमनंसतांचैवानुकीर्तनात् २४ अतएवाहंकुलपतिनाभगवता
प्रारब्धस्वस्त्ययनकर्मणःशेषभूतंसर्वोत्पातशमनंशांत्युदकमुपनेतुंराज्ञोहरिश्चंद्रस्यशैब्यायाश्चसकाशंप्रहितः प्रविश्यप्रतीहारी [4]ए
दु[5]भवं, इत्यपसर्पतः तापसः उपसृत्य राजनस्वस्तिभवते राजा ससंभ्रममुत्थायभगवन्नाभिवादये शैब्या [6]भअवंपणामामि,
तापसः राजन्विजयीभव भवतिवीरप्रसूर्भूयाः राजा ससंभ्रममासनमासनं प्रती० आसनमुपनयति राजा इदमासनम-
त्रोपविशतुभवान्इतिसर्वेउपविशंति राजा हेमप्रभेद्वार्यवहिताभव प्रती० [7]जंभवंआणवेदि, इतिनिष्क्रांता तापसः राजन्प्र-
तिगृह्यतामिदंभगवतःकुलपतेराशीर्भिरुपबृंहितप्रभावंनिशाप्रजागरांतेसकलत्रस्यभवतोभिषेचनायस्वस्त्ययनशेषंभगवतानु
प्रेषितंशांत्युदकं राजा सहर्षमंजलिंबध्वामहान्प्रसादः ताप० मंत्रैःपूतंशमितदुरितैःक्षत्रतेजोभिवृद्ध्यैप्रारब्धस्यप्रशमनविधि
धेरापदामुन्मुखीनां एतत्पुण्यंकिमपिपरमंतेक्रियाशेषमंभोभूयाद्भूत्यैवितरतुमुदंव्यापदोहंतुसर्वाः २५ इत्यभिषिंचति राजा

१जयतु २महाराजः एषकुलपतिसकाशात्तापसः प्राप्तः, ३यन्महाराजआज्ञापयतीति, ४एत्वेतुभवान्, ५भगवान्प्रणमामि, ६यद्भवानाज्ञापयति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्पर्शमभिनीय अये इदंतत्क्षत्रबीजस्य प्रसवांकुरकारणं यस्यप्रसादादादित्यैर्नृपैरुच्चैर्धृतंशिरः २६ तापसः भवतिशैब्ये त्वया पिभगवतःकुलपतेरादेशात्सविशेषमद्यप्रवर्तयितव्यो गृहदेवतानांब्राह्मणानांच पूजासंभारः शैब्या अंजलिंबध्वा [1]जंभवंआणवेदि तापसः राजन्स्वस्तिभवते अहमपिप्रारब्धविविधविधिविस्तरंभगवंतंकुलपतिमेवसंभावयामीतिनिष्क्रांतः शैब्या सवैलक्ष्यं अपवार्य [2]हंजेचारुमदिएंभअवदाकुलवदिणासमादिट्ठोअज्जउत्तस्सणिसापजाअरोतादुज्जणीकिदह्मिइमिणादुप्पच्चएणदुट्ठहिअएणभोदुएवंदाव, अंजलिंबध्वाप्रकाशं [3]पसीददुअज्जउत्तो, राजा सानुरागंग्राह्यः प्रियेयदिमयालुनयस्तवायमिथ्यापराधकलुषीकृतश्चेतसापि आरोपयामिनवहारलतांसुकंठेपत्रावलीं विरचयामिकपोलदेशे २७ शैब्या लज्जांनाटयति राजा नाट्येनतथाकुर्वन् प्रिये नवसपुलकस्वेदोगंडः करेममवेपथुस्तदुभयविधिर्व्यर्थारंभोहृथेवममश्रमः अपिविनिहितः कंठेहारस्तताप्रतरंगितोमन्मकरपरिषंगप्राप्तंनमुंचतिवेपथुं २८ शैब्या अज्जउत्तभअवदाकुलवदिणाजधाआणत्तंतधाअणुचिट्ठिदुंगमिस्सं, राजा देवि एवंक्रियतामित्यक्रमेणनिष्क्रांते राजा वयस्यकथंपुनरिदानींसोत्कंठमात्मानंविनोदयामि विदू० [4]भोवअस्सतुमंदेवीसंबद्धाएकधाएकीस्सणअत्ताणअंविणोदेसिअहंपिभोअणकधाएअत्ताणअंविणोदइस्सं, प्रविश्यवनेचरः [5]जेअदुभट्टा, [6]ऐसोखुविअडघोणग्गणिद्दलिदमुत्थत्थलीलग्गपरिमलुग्गारफुरहिणीसासमारुदपरिक्खित्तनंतजंतंतरदरन्वाक्खिवज्जंतपंडरकसेरुकक्कर छलप्र

१ यद्भवानाज्ञापयति, २ हंजेचारुमतिके भगवताकुलपतिनासमादिष्टआर्यपुत्रस्यनिशाप्रजागरस्तद्दुर्जनीकृतास्मिअनेनदुष्प्रत्ययेनदुष्टहृदयेनभवत्वेवंतावत्, ३ आर्यपुत्रभगवताकुलपतिनायथाज्ञप्तंतथानुष्ठितुंगमिष्यामि. ४ भोवयस्यत्वंदेवीसंबद्धयाकथयाकस्मान्नात्मानंविनोदयसिअहमपिभोजनकथयात्मानं विनोदयामि, ५ जयतुभट्टः, ६ एषखलुविकटघोणाग्रनिर्दलितमुस्तास्थलीलग्नपरिमलोद्गारस्फुरभिनिश्वासमारुतपरिक्षिप्तदंतयंत्रांतरदरन्वर्वितपांडुरकशेरुकर्पर छलप्र-

श्री

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इण्णपडिवक्खजअविढत्ताणिअजसक्कुरपूरिददसादिसाविभाओ. वरिसंतासिलासारोविअणवजलहरो. गरुअगव्वगंभीरघुरु-
घुरासद्दविद्दाविदवणासिंहणिअरखाअण्णणामरिसउण्णमिदकण्णसक्तिपुडमुव्वहंतो. विप्फुरंतगरुअरोसाणलसिहासंदे-
हिज्जंततरलतरजीहालदाविंत्थारो. णिरंतरपरिप्फुरंतवणलग्गदावाणलुग्गारभासुरो. विअडतडिच्छडाकडारकेसरसडा-
कडप्पो. णिसिदकरवालविमलेंदणीलकज्जलतमालसामलो. परिप्फुरंतपिंगच्छिविच्छोहो. बहलमसीमंसलोफुलिंगसेसोविअदावा-
णलो. दंतंतरखंडणभअकुंडलिज्जंतविसदंडभासुरविअडदाढाकरालमुहमंडलो. चिरआलसंघडिदवेराणुबंधगरुअरोसक्कम्भड-
कवलग्गहविखंडितचंदमंडलुच्चरंतकलाजुअलसोहासणाहोविअपलआणिसातिमिरसंघाओ. ओदालिदधरावलअलीलासमुत्थि
दोविअमहावराहो. उत्थिदोवराहजूधाधिवईमअव्वभूमिंताएदंक्खणिअभट्टापमाणं. अहंपितहिंजेव्व गच्छामि, राजा सहर्षं हंत-
लब्धमिदानींविनोदस्थानं विदू॰ सरोषं भोवअस्सअरण्णचंकमणकंटअसआविमद्दणसमविसमलंघणबुभुक्खापिपासादोस-
कीर्णप्रतिपक्षक्षयविधृतनिजयशउत्करपूरितदशदिशाविभागोवर्षितशिलासारइवनवजलधरोगुरुगर्वगंभीरघुरुघुराशब्दविद्राविनवनासिंहनिकररवाकर्णना
मर्षोन्मिमितकर्णशक्तिपुटमुद्वहन्विस्फुरद्गुरुरोषानलशिखासंदेहायिततरलतरजिव्हालताविस्तारोनिरंतरपरिस्फुरद्वनलग्नदावानलोद्गारभासुरोविक-
टतडिच्छटाकडारकेसरसटाकलापोनिशितकरवालविमलेंद्रनीलकज्जलतमालश्यामलः परिस्फुरत्पिंगाक्षिविक्षोभोबहलमषीमांसलः स्फुलिंगशेषइवदा
वानलोदंतांतरखंडनभयकुंडलायितविसदंडभास्करविकटदंष्ट्र करालमुखमंडलश्चिरकालसंघटितवैरानुबंधगुरुरोषोद्भटकवलग्रहविखंडितचंद्रमंडलोच्च
रत्कलायुगलशोभासनाथइवप्रलयनिशातिमिरसंघातःअवतारितधरावलयलीलासमुत्थितइवमहावराहउत्थितोवराहयूथाधिपतिमृगव्यभूमिं तस्मा
दिदंश्रुत्वाभट्टःप्रमाणंअहमपितत्रैवगच्छामीतिनिष्क्रांतः, १भोवयस्यअरण्यचंक्रमणकंटकशरविमर्दनसमविषमलंघनबुभुक्षापिपासादोष — — ५

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संकुलंबहुपच्चवाअंजइमअव्वंविणोअणोवाअंनाकिंउणादेआआसट्ठाणंभविस्सादि, राजा वयस्य मृगयाहिनामभृशमुपकारिणी राज्ञां तथाहि खिन्नंविनोदयतिमानसमातनोतिस्थैर्यंचलेवपुषिलाघवमादधाति उत्साहबुद्धिजननीरिणकर्मयोग्यांराज्ञांमुधैवमृगयांव्यसनंवदंति २९ तदेहिनत्रैवगच्छावइतिनिष्क्रांनाःसर्वे इतिआर्यक्षेमीश्वरकृतेचंडकौशिकनाटकेप्रथमोंकः १

संकुलंबहुमत्स्यवाम्यंयदिमृगव्यंविनोदनोपायं तात्किंपुनस्तेआवासस्थानंभविष्यति,

For Private and Personal Use Only

श्रीगणेशायनमः नेपथ्ये मोवहारान्वेषिणः एषदक्षमाति पंकंदलतिकमलिनीमत्तिगुंद्राप्ररोहासारात्मुस्तास्थलानिस्थपुटय-
तिजलान्युत्कसेतूनियानि प्रातःप्रातःप्रविष्टोवनगहनमयंयातियातीनिसैन्यैःपश्चादन्विष्यमाणःप्रविशातिविषमान्काननांतान्व
राहः १ तदवष्टभ्यतांसमंताद्वनानि आस्तीर्यतांमुपांतेवनवृतिनिपुणैर्जालिकैर्जालबंधामुच्यंतांश्चंरवलाभ्यःश्वगणिरटवीगव्ह-
रेसारमेयाः आकीर्यतांस्थलानिश्रमशिथिलहयैःसादिभिःपाशहस्तैर्व्याभूयंतांकृतांतैरिवमाहिषच्चरैर्दंडिभिःकाननानि २ ततः
प्रविशातिरौद्रोज्वलवेषः संभ्रांतोविप्रराट् साशंकं शंभोःसमाधिरपियेनकृतांतरायोदक्षस्यचाध्वरविधिःशिवयोश्चकेलिः सो
हंजगत्त्रयहितव्यवसायसिद्धिविध्वंसविभ्रमपरःपरमोस्मिविघ्नः ३ तदहमिदानीं विद्यात्रयंहरिहरात्मभुवामसाध्यमुग्रैस्त-
पोभिरिहसाधयतोमहर्षेः क्रीडावराहवपुरद्यसमुद्धरामिलोकत्रयंहरिरिवादिवराहरूपः ४ पश्चादवलोक्यसभयं अहोमेजग
त्कल्याणपरिपंथिनःपरपौरुषांतरायरसिकस्यानपेक्षितशरीराणिसाहसानि यतः कृतांतदंतांतरवर्तिनमात्मानंमन्यमानेन-
कथंकथमपिशरगोचरंपरिहृत्यनीतस्तावदयंमयामहाराजहरिश्चंद्रइममरण्योद्देशंतद्यावद्विश्वामित्रस्याश्रममनुप्रापया
मि यतः तेनकिलतीव्रतपसाक्षात्रियब्राह्मणेनसर्गांतरप्रथमप्रजापतिनात्रिशंकुयाजकेनोत्पत्तिस्थितिप्रलयविधायिनीनां
गुणत्रयमयीनांविद्यानांसिद्धयेकिमपिदुष्करमारब्धंवर्तते तथाहि यतोधाताविश्वंसृजतिनहरिर्नापिचहरोहरिर्गोपालोका
नवतिनविरिंचिर्नचहरः यतःसंहर्तासोहरतिहरएकस्त्रिभुवनंतदेकस्मिन्सिद्धिंव्रजतिकथमन्यत्रनिखिलं ५ विचिंत्य अ- ६
थवापरमनैष्ठिकेस्मिन्किंनसंभाव्यते किंतुस्फलमकोपतयामुनिस्वभावानांकामक्रोधयोश्चश्रेयःपरिपंथिनीवृत्तिमाश्रित्ये

दमुपक्रांतं तन्नजाने किमत्रफलिष्यतीति नेपथ्ये गहनतरवनांतर्धानगर्वितेतिष्ठरेक्रोडाधमतिष्ठ दूरंकुतूहलवशात्क्षणदृष्ट-
नष्टमायामिवाश्रितवताषहृतस्त्वयाहं पंथानमेषियदिमेदृशोस्तदानींमृङ्गासिदुष्टनपुनर्नलिनीवनानि ६ विप्रः श्रुत्वासहर्षं
अयेकथमासन्न एवायंतद्यावदितोनिर्गत्यतामेवमायामास्थायदर्शयाम्यात्मानमितिसत्वरंपरिक्रम्यनिष्क्रांतः ततः प्रविशतिगृही
तशरासनोनुसरणंनाटयन्रथस्थोराजासारथिश्च रा॰ पूर्वोक्तंपठित्वा सा॰ अग्रतोवलोक्यसहर्षं आर्यायनातिदूरवर्तिनातेनभ
वितव्यं तथाहि पश्य मृणालीभिःकीर्णाकवलगलिताभिर्वनभुवः सरस्तीरेधाराः क्षुभितजलनिष्यंदपथसांश्रमोद्गीर्णैः फेनैः
शबलनवशष्पाःस्थलभुवोघनास्तान्निश्वासैर्मरुनइहमुस्ताक्षरभयः ७ निपुणमवलोक्य सहर्षं आर्यायमसौपश्य २
हेलावलितकंधरः सरभसमोत्खातकंदांकुरव्यासक्ताकुललोलनालनलिनंवक्त्रांतराले वहन् अंतर्गूढविरूढनाभिनलिनमामा
सनांभोरुहःक्रीडाक्रोडइवोद्दिधीर्षतिपुनर्दंष्ट्राग्रलग्नांभुवं ८ सानंदं कथमवलोक्यमामभिमुखमाप तितइतिशरसंधानंना
टयति सूतः सकौतुकमवलोक्य आयुष्मन्पश्य २ गर्वादेत्यपुनर्निवृत्यतरसालक्षीकृतस्तत्क्षणंत्रासाकुंचितमायतायन्वरणः
पश्चार्धमाकर्षयन् श्वासोद्रेकविदीर्णसृक्कविवरक्षरश्यन्मृणालांकुरोदंष्ट्रामर्पयतीवनेव्यपगतव्रीडाविलक्षाननः ९ राजा
बाणमोक्षंनाटयन् उपसृत्यसमंतादवलोक्य साश्चर्यं अयेकथमनवसरएवैतत्क्षणातिरोहितेस्मिन्बाणमोक्षःकृतः तथा
हि क्षणादंतर्धत्तेक्षणमथदृशोरेतिविषयंमुहुर्दूरंयातोभवतिपुनरप्यंतिकचरः पुरःपार्श्वेपश्चाद्भ्रमतिपरितस्तत्कथमसंस्तु
रहितुल्लोलंकलयतितुलक्ष्यंममनः १० निपुणमवलोक्य दूरतोदृष्ट्वा सानंदंकथमिमामरण्यानीमतिक्रम्यप्रसन्नांभुवम-

धिरूढः सूत २ सत्वरंप्रेरयाश्वान् क्वपुनरिदानींयास्यति सूतस्तथाकृत्वारथवेगमाभिनीयआयुष्मन्पश्य २ जवाज्जित्वा
पश्चात्सततरजसःपृष्ठमरुतः पुरोलक्ष्यासन्नित्वरितमनुधावन्ममनः अयंतेनिष्कंपध्वजपटपरा मृष्टजलदोरथस्तांस्तान्देशा
नभिपतन्नितुल्यंत्वदिषुभिः ११ राजा सविस्मयं तथाहि दिविव्यावल्गाद्भिर्विजितपवनैःस्यंदनहयैर्जवादुत्क्रामाद्भिर्जलनिधिभि
वान्हायपततः अहोदूराद्दूरंव्रजतिममभिन्नांजनचयच्छविश्यामःक्रोडोदिनकृतइवध्वांतनिचयः १२ अग्रतोवलोक्य सखेदं क
थमिमामरण्यानीमतिक्रम्यसंप्रत्यस्तमितदर्शनस्यपदपंक्तिरप्यंतर्हिता भवतु अग्रतस्तावदिमांसुस्निग्धामरण्यलेखांविविनो
मि इतितथाकुर्वन् सानंदंहंतहंततपोवनोपकंठेनानेनभवितव्यं तथाहि आमूलंक्वचिदुत्स्थताक्वचिदपिच्छिन्नास्थलीबर्हिषामा
नम्राःकुसुमोच्चयाच्चसदयाकृष्टाग्रशाखालताः एतेपूर्वविलूनवल्कलतयारूढव्रणाःशाखिनः सद्यश्छेदममीवदंतिसमिधांप्र-
स्यंदिनःपादपाः १३ समंतादवलोक्यश्रुतिमभिनीय सकौतुकं आर्यपश्य २ नीपस्कंधकुहारिणिशुकाःस्वागतंव्याहरंतिघ्राण-
ग्राहीहरति हृदयंहव्यगंधःसमीरः एतामृग्यःसलिलपुलिनोपांतसंसक्तदर्भंपश्यंत्योस्मान्सचकितदृशोनिर्झरांभःपिबंति १४
नदलमिदानीमाश्रमोपशल्यचारिणानेनान्विष्टेन सूतसंप्रतिगृहीतोदकान्विश्रामयाश्वान् यावदहमपिधनुर्मात्रसहायएवाश्र
मपदंप्रविश्यमुनीनभिवादये अतिक्रांतान्यर्हणीयसभाजनानिकिलश्रेयसांपरिपंथीनिभवंतिइतिरथावतरणंनाटयति सूतः
यथादिशतिस्वामीतिनिष्क्रांतः राजा चिंतांनाटयित्वा सश्लाघं अहोनिर्ग्रंथिरमणीयतयानिरतिशयानितपोवनवासिनांसु
खानि कुतः मनःसंभोगेभ्यःस्पृहयतिनसंकल्पविरतंवियोगेषुस्नेहान्विदधतिनवानिर्ममतया अहंकारत्यागान्निजपरविभाग



For Private and Personal Use Only

व्युपरमेपरांशांतिंप्राप्ताःकिमपिस्फधियःसंयमधनाः १५ सविनयं परिक्रम्यसाध्वसमभिनीय साशंकं अयेकथंसापराधस्येवसाध्व-
ससुपजनयंत्यप्रश्रयदुरालोकान्यदृष्टपूर्वनयातपोवनानि अथवासर्वाभिभाविकिमप्यनभिभवनीयंतेजसासुपरितपोमयंब्राह्मंतेजः
कुतः पदेपदेसाध्वसमावहंतिप्रशांतरम्याण्यपिमेवनानि सर्वाणितेजांसिमृदूभवंतिस्वयोनिमासाद्ययथाग्निरंभः १६ इतिससा-
ध्वसंपरिक्रामति नेपथ्ये परि त्ताअधअज्जापरि त्ताअध एदाओअणवरझ्झमाणाओअणाधाओअसरणाओहुदवहेपक्खि-
खिविद्यामोमंदभाइणीओनापरि त्ताअधअज्जापरि त्ताअध राजा श्रुतिमभिनीय ससंभ्रमं अहहइतोनातिदूरेभयार्तानां
योषितामिवार्तःप्रलापःश्रूयते साश्चर्यं अयेतपोवनमिदंक्वपुनरत्रेदृशानामविनीतानांसंभवः भवतूपसर्पामि तथाकरोति नेपथ्ये
तथैवपठ्यते राजा श्रुत्वासावष्टंभं अभयमभयंभयार्त्तानां सक्रोधं आः कोयंतपोवनविरुद्धमनात्मनीनंक्रूरोनृशंसमनुतिष्ठति
कर्मघोरं तस्यैषबाणपरिलूनशिरोधरस्यप्रत्यंगमुज्वलशिखेज्वलनेजुहोमि इतिपरिक्रम्यनेपथ्याभिमुखमवलोक्य सविस्मयं
अयेकोयंमध्येस्युपासीनेनविलपताभयार्त्तेनदिव्यरूपिणानारीत्रयेणासहस्तन्निहितवह्नोमसाधनोग्निशालामध्यास्ते नूनंतापस-
कल्पधारिणापाखंडेनानेनभवितव्यं ततःप्रविशतिहोमंनाटयन्विश्वामित्रोयथानिर्दिष्टाश्चविद्याः२ संभ्रमंनाटयंत्यःपूर्वोक्तंप-
ठंति विश्वामित्रः साश्चर्यं अहोनुखलुभोः वहतिहविरुपांशुमंत्रपूतंभवति तथापि नदक्षिणार्चिरग्निःकिमिदमुपनताःक्रिया
प्रभावान्ममवशित्वमिमाःप्रयांतिविद्याः १८ इतिसमाधिंनाटयति विद्याःपूर्वोक्तंपठंति राजा सत्वरमुपसृत्यअभयमभयं

१ परित्रायतार्याःपरित्रायत एताअनपराध्यमानाअनाथाअशरणाहुतवहेपरिक्षिप्यामहेमंदभाग्यास्तस्मात्परित्रायतार्याःपरित्रायत.

भयार्त्तानां तिष्ठरेदुरात्मन्चारवंडाधमतिष्ठकएषतेप्रच्छन्नराक्षसस्यमायाप्रपंचः तथाहि वासोवल्कलमक्षसूत्रवलयीपाणिर्जटा
लंशिरः कोयंवेषपरिग्रहोगुरुतपोदांतस्यशांतात्मनः केयंतेशठदुर्मतेरकरुणाबीभत्सनारीवधक्रीडापातकिनीमतिर्भजफलंस्व-
स्याधुनाकर्मणः १९ विश्वामित्रः संवरणानाटयन्सक्रोधं एषप्रासंधनश्रीःश्रवणकटुतराक्रोशसंघट्टजन्मादक्षोभाद्दतःसमाधिव्य
पगमपवनोद्दीप्यमानोरुदीप्तिः लीलामासाद्यसद्यःक्षयपवनसमुद्भूतकल्पांतवह्नेस्त्रैलोक्यग्रासतृष्णामपनयतुममक्रोधजोजा
तवेदाः २० विद्याःसहर्षं प्रियंनःप्रियंविजयतां २ महाराजहरिश्चंद्रइतिनिष्क्रांताः विश्वामित्रः दृष्ट्वासक्रोधं अयेकथमसौदु-
रात्माहरिश्चंद्रोस्माकंश्रेयसामंतरायःसंवृत्तः तिष्ठरेक्षत्रियापसदतिष्ठ कामंहरिर्भवविमूढभवाथचंद्रश्चंद्रार्धमौलिरथवाहरए-
वभूयाः विद्याप्रणाशपरिवर्धितघोरदीप्तेःक्रोधानलस्यममनेंधनतांप्रयासि २१ अपिचरेमूढ कांनाकेलिमयोपिभूरिकरुणा-
शांतोप्यसौसंयमीक्रीडारूढसमाधिभंगविकटभ्रूभंगभीमाननः दृष्ट्वाकृष्टशरासनंयदकरोत्क्रुद्धःपिनाकीस्मरंत्वामप्यद्यदृशात
देवकुरुतेक्रोधादयंकौशिकः २२ राजा ससंभ्रममात्मगतं अयेकथंसभगवान्कौशिकोयं ताश्चभगवत्योविद्याः यासांसिद्ध
मप्यस्यपापोंतरायःसंवृत्तः नूनमसमीक्ष्यकारिणामग्रंधेनेवस्फुरच्छिखाकलापोज्वलनएवपद्भ्यामाक्रांतः कौ॰ सक्रोधं प्रार-
ब्धसाधनविघानविवृद्धमन्योःशापायधावनिकरोममदक्षिणोयंजानिंस्मरन्नपिचिरायसमुज्झितांतांसव्येनरक्तममचापमुपे
तिपाणिः २३ इत्युत्तिष्ठति रा॰ सभयमुपसृत्यभगवन्नभिवादये कौ॰ क्रोधनाटयति राजा पादयोर्निपत्यभगवन्मर्षय२ स्त्रीज
नार्तप्रलापमायावंचितस्याविजानतोमेक्षंतुमर्हसि कौ॰ दुरात्मन् किंनामाविजानतोमेक्षंतुमर्हसि अरेरेक्षुद्रनाकिलनाम-



For Private and Personal Use Only

भवतोऽहंविदितः जातिस्वयंग्रहणादुर्ललितैकविप्रंदृप्यद्वसिष्ठस्तनकाननधूमकेतुं सर्गांतराहरणभीतजगत्कृतांतंचंडालयाजिनम
वेषिनकौशिकंमां २४ राजा भगवन्प्रसीद२ नैवमवगंतुमर्हसि अन्नक्षयादिषुनथाविहितात्महानिंराजप्रतिग्रहपराङ्मुखमानसं
त्वां आर्डीबकप्रधनकंपितजीवलोकंकस्तेजसांचतपसांचनिधिंनवेत्ति २५ किंतुभीरुजनार्तप्रलापमुपश्रुत्येदमुपक्रांतं स्वधर्मा-
क्षिप्तचेतसस्त्वामविजानतोमे क्षंतुमर्हसीतिविज्ञापयामि कौशि० दुरात्मन्कथय२ कश्च२ तेधर्मइति राजा भगवन् दातव्यंरक्षि
तव्यंचयोद्धव्यंक्षात्रियैरिति गीतःपुराणैर्मुनिभिरेषधर्मःसनातनः २६ कौ० किंनामदातव्यमित्यादिपठति राजा अथकिं
कौ० यद्येवं कथयकस्मैदातव्यंकश्चरक्षणीयः केनसहयोद्धव्यं राजा भगवन्श्रूयतां कौ० कथ्यतां राजा गुणवद्भ्योद्वि-
जातिभ्योदेयंरक्ष्याभयार्दिताः अरातिभिश्चयोद्धव्यमितिमेनिश्चितामतिः २७ कौ० दुरात्मन् यद्येवंमन्यसेतदादीयतामस्म
भ्यंविधानपोनुरूपंकिंचित् राजा सहर्षं नन्वनुगृहीतस्तर्हिभगवतावैवस्वतोवंशः तत्प्रसीद भगवन्प्रसीद नार्हतिसर्वस्फवना
न्यपिदक्षिणायैसर्वस्वदानाविनिवेदनकुंठशक्तिः पूर्णार्थिनैःकुशिकनंदनतुभ्यमद्यकृत्स्नामिमांवसुमतींविनिवेदयामि २८
कौ० साश्चर्यमात्मगतं भवत्वेवंतावत् प्रकाशं राजन्स्वस्तिकिंतुनादक्षिणं दानमामनंतितदर्हसिदक्षिणांदातुमिदानीं रा-
जा सव्रीडमात्मगतं किमत्रप्रतिपत्तव्यं चिरंविचिंत्य सहर्षं भवत्वेवंतावत् प्रकाशं भगवन् समुपाहृत्यदास्यामिहेम्नांल
क्षंचदक्षिणां अद्यप्रभृतिमेमासमवधिंक्षंतुमर्हसि २९ कौ० अनुमतोयमवधिः किंतुपरिहृत्यवसुमतीमन्यतः समुपा-
हृत्यदातव्यं राजा साशंकमात्मगतं कथमत्रप्रतिविधेयं विचिंत्य सहर्षं हंत२ लब्धंप्रतिविधानंयतोस्तिकिलभगवतःशि

 

वस्यपरिग्रहः परंक्षेत्रं वाराणसीतिवसुधानलभोगाभिन्नांयामंतरिक्षनगरींमुनयोवदंति श्रद्धेयमागमदृशोविदुरंतरालंबालाग्र
भागपरिपाटिसहस्रसूक्ष्मं ३० ततआहृत्यदास्ये प्रकाशं भगवनृयदादिशसि आभरणान्यवतार्य भगवन् एताः श्रियोभ
गवतीवसुधातथेयमस्याण्यभूनिनृपलांछनमेषमौलिः तद्दर्शनादलुगृहाणमयोपनीतमेतत्पुनःकुशिकनंदनपादयोस्ते
३१ इतिपादयोर्निपत्योत्थायसहर्षमात्मगतं दिष्ट्याफलितमिदानीमायासभूयिष्ठेनापिमेराज्यभारेण सानंदं मयामुनेरयं-
मन्युर्योक्ज्ञइतिशंकितः सएषकुसुमापीडःपतितोममर्मूर्धनि ३२ भगवतिवसुधरेतदियमापृच्छासि वैवस्वतैर्नृपतिभिः किललो
कथात्रित्वंदेविवीरयशसासहरक्षितासित्यक्तामयायदसि दुर्लभपात्रलोभादेकंक्षमस्वममदुर्नयमेनमंब ३३ तद्यावदयोध्यां
गत्वाभगवतःप्रतिश्रुतंसंपाद्यदक्षिणोपार्जनायवाराणसीमेवगच्छामि प्रकाशं भगवन्नितोयोध्यांगत्वाकृतकृत्यंनिर्वर्त्यदक्षिणो
पार्जनायमामाज्ञापयितुमर्हसि कौ॰ साश्चर्यमात्मगतं अहोदुरात्मनःस्थैर्यंमहानुभावतांच दुरात्मन्नचिराद्द्रक्ष्यामितेशौंडीर्यं
तथाहि पश्यामियावच्चलितंनसत्याद्राज्यादिवस्वादचिराद्भवंतं त्वद्दुर्नयोद्दीपिततीव्रतेजास्तावन्नमेशांतिमुपैतिमन्युः प्रका
शं राजन्नेवमस्तुकोदोषः इतिनिष्क्रांतौ इतिचंडकौशिकेद्वितीयोंकः २ १ ७ ७ ७
ततःप्रविशतिकृतबीभत्सवेषःपापपुरुषः पापपुरुषः विकटंपरिक्रम्योच्चैर्विहस्य मुहमेत्तमहुलमहुलेसोआविओआ
हिवाहिकडुमज्झे बहुणलकदुःखदालुणपलिणामेदु क्कलेक्खुहगे पुरतोवलोक्य सभयमुपसृत्य हमादिएउच्छो-

१ मुखमात्रमधुरमधुरः शोकवियोगाधिव्याधिकटुमध्यः बहुनरकदुःखदारुणपरिणामोदुष्करः खल्वहम्, २ हामातृकेउत्सा-

दिदह्निवावादिदेहि इमाएदुगोजुणामधेआएदुट्ठुणअळीए त्ति ठुदुदावइध प्पवेसेपेच्छिदुंपिणपालेमिएदं ताकिंणुखुए त्थ कलईस्सं, संप्रधार्य भोदुइदोएअंतेभविअचि ट्ठि स्संजेणपविसंनेहिंजणेहिंजम्मंनलसंचिदेपाडि ञ्च न्तेनाणंणिक्कमनाण-पुणोविपच्छाअणुलग्गिस्सं नेपथ्ये शंभोःपादाक्रमुद्राशिरसिभगवतस्तस्यनादृक्प्रसादःपुत्रप्रीतिर्भवान्याःश्रुतमतनुतन-थानेष्ठिकंतत्तपोमे स्नाय्वस्थिग्रंथिसारंतदपिवपुरिदंजर्जरत्वङ्निबद्धंयत्सत्यंदुर्विलंघ्याभवतिपरिणतिःकर्मणांप्राक्तनानां १ पुरुषः सावष्टंभं ओअत्थिजे व्वएदंजइएदाएदु ट्ठुणअलीएसेलाआदुलाआलेहलि च्चंदेणहोदि, सविस्मयं केएसेमंनेदि, कएषमंत्रयतिनेपथ्याभिमुखमवलोक्य केहंभअवदोविसमलोअणस्सआसंणपडिचालकेभअवंभिंगीइदोए व्वआअन्च्छदितातुलिअंअवक्कमामि, इतिनिष्क्रांतः ततः प्रविशतिभृंगिरिटिः २ शंभोरित्यादिपठति, विचिंत्य कथमन्यथाराजर्षेर्हरिश्चंद्रस्यापिदशाविपर्ययमद्यदेवोदेव्यैनिवेदितवान् यस्याद्भुतंकथयतश्चरितंभवस्यरोमांचाभिन्नकणभस्मघनांगयष्टेः व्याविलीनन्निनयनत्रयमाविरासीद्हल्लच्छशांकशकलश्चपलश्चमौलिः २ अद्यासाविहप्रवेक्ष्यतीतिसमंदेव्यादेवोमृगांकमौलिरपिपर्युत्सुकएवतद्यावदहमपिभगवतःपूजांनिर्वर्त्यसज्जीभवामीतिनिष्क्रांतः प्रवेशकः ततः प्रविशतिसचिंतोराजा २ दत्वैतांद्विजसत्तमायवसुधांप्रीत्याप्रसन्नंमनः स्मृत्वातांम्यतिदक्षिणांविधिवशाद्गुर्वीमनिर्यातितां कर्तव्योनधनागमोस्यविषयेस्थानंप्रवादितोस्मिव्यापादितोस्मिअनयादुर्गेयनामधेययादुष्टनगर्या तिष्ठतुतावदत्रप्रवेशः प्रेक्षितुमपिनपारयाम्येतां नत्किंखल्वत्रकरिष्यामि, १ भवतुइतएकांतेभूत्वातिष्ठामियेनप्रविशाद्भिर्जनैर्जन्मांतरसंचितेपरित्यक्तेतेषांनिष्क्रमतांपुनरपिपश्चादनुलगिष्यामि, २ आः अस्त्येवैतत् यद्येतस्यांदुष्टनगर्यांसिराजादुराचारोहरिश्चंद्रोनभवति, ३ कथंभगवतोविषमलोचनस्यासन्नपरिचारकोभगवान्भृंगिरितएवागच्छति तस्मात्वरितमपक्रमामि.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नीपतेराहूर्यन्नवस्कंधरेतिनदहंवाराणसींप्रस्थितः ३ चिंतांनाटयित्वादीर्घंनिःश्वस्यकष्टंभोः कष्टं दाराःसूनुरयंशरीरकमिदंत्यागा
वशिष्टंत्रयंसंप्राप्तोवधिंरद्यसत्यमपरित्याज्यंमुनिःकोपनः ब्रह्मस्वोपहतंचजीवितमिदंनत्यक्तुमप्युत्सहेकिंकर्तव्यविचारमूढमन
सःसर्वत्रशून्यादिशः ४ अग्रतोवलोक्य सहर्षं कथमियंवाराणसी भगवतिवाराणासिनमस्ते विचिंत्यसाश्चर्यं यद्वांच्छंतिक्षपि-
ततमसोब्रह्मचर्यैस्तपोभिःप्रव्रज्याभिःश्रुतशमदमानाशकेर्ब्रह्मनिष्ठाः तद्देहांनेकथयतिहरस्तारकंज्ञानमस्मिन्प्राणत्यागाद्भवति
नपुनर्जन्मनेयेनजंतुः ५ अपिच विमुच्यंतेजंतोरिहनिबिडसंसारनिगडाःशिरस्तद्दैरिंचंन्यपतदिहहस्तात्पशुपतेः विमुक्तस्त-
त्पापाद्भवदविमुक्तःसभगवान्नमुक्तंतेनैतत्सहदयितयाक्षेत्रमसमं ६ तत्केनोपायेनमुनेरानृण्यमुपगच्छामि सचिंतं किंजि
त्वाधनमाहरामिधनदंत्यक्तश्रियःकिंजयैर्याञ्चादैन्यमपिद्विजातिसुलभंनक्षत्रियाःकुर्वते वाणिज्यंधनमूलमस्तिनधनंनिष्किं
चनस्याद्यमेसर्वकालमपेक्षतेविधिवशान्नैवास्मिकालाक्षमः ७ तत्किंकरोमिमंदभाग्यः संप्रधार्यसहर्षं हंत २ तदहमिदानीं
आत्मानमेवविक्रीयसत्यंरक्षामिशाश्वतं तस्मिन्नरक्षितेनूनंलोकद्वयमरक्षितं ८ सावष्टंभं तद्यावदेववत्सरोहिताश्वमनु-
पालयंतीदीर्घाध्वविश्रांतादेवीनागच्छतितावदेवाहंसत्वरमुपगम्यात्मनःसमीहितंसंपादयामि ऊर्ध्वमवलोक्यकथंमध्यम
न्हःसमारूढोभास्वान् तथाहि तपतितपनश्चंडस्तीक्ष्णं स्फुरन्निवकौशिकोवहतिपरितस्तापंपंथाययथाममानसं इयमपि
पुनश्छायादीनांदशांसमुपस्थिताहतविधिवशाद्देवीवाधोनिषीदतिभूरुहां ९ तदिदमासन्नमवधेःपर्यवसानं अथवाहरि-
श्चंद्रस्यैव हाहतोस्मिमंदभाग्यइत्यात्मानंपातयित्वासहसोत्थाय सनिर्वेदं दुरात्मन्हरिश्चंद्रहतक प्रतिश्रुतांसंप्रतिदक्षि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णांप्रागपूरयित्वाद्विजसत्तमाथ ब्रह्मस्वदग्धश्चलितश्चसत्याद्भ्रमिष्यसित्वंशठकान्प्रदेशान् १० तद्यावद्वणिग्वीथीमवतीर्यप्रकृतमनु
तिष्ठामि आगतप्रायेणतेनमुनिनाभवितव्यं इतिसत्वरंपरिक्रम्यैकांतेस्थितः ततःप्रविशतिनाटयन्कौशिकः२ प्रणाशाद्विद्याना-
करतलगतानामुपचितोनिरुद्धोदुर्बुद्धेर्विनयमसृणोस्यन्तरितैःशिखीवेगादंतर्ज्वलितघनशुष्कैंधनगतोबहिर्धारासिक्तंविपिनामिवमन्युर्द
हतिमां ११ सामर्षं दुरात्मन्हरिश्चंद्रहंतक पश्यामियावज्ज्वलितंनसत्याद्राज्यादिवस्वादचिराद्भवंतं त्वद्दुर्नयोद्दीपिततीव्रतेजास्तावन्न
मेशांतिमुपैतिमन्युः १२ दृष्ट्वासविस्मयं अयेकथमसौप्राप्तएवदुरात्मा अथवामहात्मैव भवतूपसर्पामि तथाकृत्वा सक्रोधं आः
कथमद्यापिनसंभृतानिमेदक्षिणासुवर्णानि राजा ससंभ्रमं कथंभगवान्कौशिकः भगवन्नभिवादये धिगनार्यकिमद्याप्यली-
कवाङ्माधुर्यैरस्मान्वंचयितुमिच्छसि रा० कर्णौपिधाय भगवन्मर्षय२ कौ० क्रोधंनाटयित्वा दुरात्मन्नलीकदानसंभावनाप्र-
ख्यापितमिथ्यापौरुषप्रपंचतिष्ठ२ पूर्णेवधावपिददासिनदक्षिणांमेवाग्भिरक्तशुष्कमधुराभिरुपस्थितोसि दत्ताप्रदानकुपितेन
मयाविमुक्तःशापानलस्त्वयि भवत्वयमद्यघोरः १३ इतिशापजलंगृण्हाति राजा ससंभ्रमं पादयोर्निपत्यभगवन्प्रसीदमर्षय२
अस्तंरवावसंप्राप्तेप्यद्यदिनामोपिदक्षिणां शापार्होवावधार्होवास्वाधीनोयंजनस्तव १४ तत्प्रसीदवणिग्वीथीमवतरावः कौशि०
शापजलमुपसंहृत्यभवतुतत्रैवगत्वाप्रयच्छ तद्यावदहमपिद्वितीयंसवनंनिर्वर्त्यागच्छामिइतिनिष्क्रांतः राजा सनिर्वेदमात्मग
तं लोकद्वयमतिभयैकनिदानमेतद्धिक्प्राणिनामृणमहोपरिणामघोरं एकःसएवहिपुमान्परमास्मिलोकेऋणद्रस्ययेनधनिकस्य-
मुखंनदृष्टं १५ परिक्रम्यदृष्ट्वासहर्षंकथमियंवणिग्वीथी शिरसितृणंदत्वासावष्टंभं भोभोःसाधवः केनापिखलुकार्येणगत्यंतरम

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्यत लक्ष्मणायं स्ववर्णानामात्माविक्रीयतेमया १६ तद्गृण्हंतुमामार्यागृण्हंतु आकाशे किंब्रूथ किमर्थमिदंदारुणंकर्मत्वया-
प्रारब्धमिति किमनेनातिनिर्बंधेन विचित्रःखल्वयंजीवलोकः पुनरन्यतोगत्वाकेनापीत्यादिपठित्वा आकाशेकिंब्रूथ कातेशक्तिः
किंचनेकर्मकीदृशंचतेविज्ञानामिति स्मित्वा यद्यदादिशतिस्वामीतत्करोम्यविचारितं शासनास्खलनंभर्तुर्भृत्यस्यपरमोगुणः १७
आकर्ण्य किंब्रूथ भूरितरंमूल्यमुक्तवानसितत्पुनस्तावदभिधीयतामिति सखेदं भोभोःसाधवः क्षत्रियावयंनपुनःपुनरभिधातुं
जानीमस्तत्क्षम्यतां पुनरन्यतोगत्वाकेनापीत्यादिपठति नेपथ्ये अज्जउ त्तमाखु २अ त्तंभरोहोहि तथास्सहसंविभ त्तंमंमंद-
भाइणिंकदुअसंपदंकादेसंविहाअपरंम्मुहदातापसीदमंजे व्वइमांस्सिंकज्जेआरोवेहि अवच्छिमोदाणिंदेपणओ, राजा सवैल
क्ष्यं कथमागतेवदेवीतन्नसंपन्नमभिलषितं ततःप्रविशतिबालकेनानुगम्यमानावैक्लव्यंनाटयंती शैब्या२ सकरुणं तदेवपठित्वा
मंदंपरिक्रम्य किणधमंअज्जाकिणधइदोअध्धमुल्लेणसमअदासिं, बालकः अज्जामंपिकिणध(आर्याः मामपिक्रीणीत)
राजा दीर्घमुष्णंचानिश्वस्यात्मगतं कष्टंभोःकष्टं धारासिक्ततृणाग्रबिंदुतरलाःकामंनिरस्ताःश्रियस्त्यक्तास्तेसुहृदोश्रुदीनवद
नानाश्वासितास्ताःप्रजाः दाराणांतनयस्यविक्रयमहोदृष्ट्वापियन्नेनसाक्रूरेणस्फुटितंनमेद्यहृदयंवज्रेणमन्येकृतं १८ शैब्या आ-
काशेकर्णंदत्वा अज्जाकिंभणादकीदिसोसमओत्ति परपुरिसपज्जुवासणंपरोच्छिट्ठभोअणंपरिहरिअसव्वकम्मकारिणित्ति

१ आर्यपुत्रमाखलु२ आत्मंभरोभवतथास्वसंविभक्तांमांमंदभाग्यांकृत्वासांप्रतंकातेसंविभागपराङ्मुखता तत्प्रसीदमामेवास्मिन्कार्येआरोपय अपश्चिम
इदानींतेप्रणयः, २ क्रीणीतमामार्याः क्रीणीतअर्धमूल्येनसमयदासीं, ३आर्याःकिंभणथकीदृशःसमयइति परपुरुषपर्युपासनंपरोच्छिष्टभोजनंपरिहृत्य-
सर्वकर्मकारिणीति



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ईदिसोमेसमओ पुनः कर्णंदत्वा [1] किंभणधकोतुमंइमिणासमयेनाकिणिस्सदिति नागच्छध पसीदध किंतुह्माणंइमिणापओअ
णंदिअवरोदीणाणुकंपीअण्णोवाकोविसाधुमंकीणिस्सदि, ततः प्रविशत्युपाध्यायोबटुश्च वत्सकौंडिन्यसत्यमेवापणेदासी-
विक्रीयते बटुः [2] किंअलिअंउवज्झाओविण्णवीअदि, उपाध्या॰ तेनैहितत्रैवगच्छावः बटुः जंउवज्झाओआणवेदि ए
दु२ उवज्झाओ एत्वेतूपाध्यायः उपाध्यायः परिक्रम्य दृस्वासाश्चर्यं अहोरामणीयकंवणिग्वीथ्याः तथाहि हेम्नामेरुवसुंधरे
वजलधेर्वेलेवरत्नैरियंनागैर्बलिपयोदविभ्रमधरैर्विंध्यस्थलीवोन्मदैः इत्थंप्रार्थितमर्थिनांविदधतीदिव्यांशुकोत्पल्लवासेयंकल्प
लतेवकस्यापिपाणिलेलिंनधत्तेमनः १९ बटुः उवज्झाअजहिंएसोगरूओजणसम्मदोदीसदितहिंताएहोद त्वंतिन क्कोमि, उपसृ
त्य अज्जाअंतरं २(आर्याःअंतरमंतर)उपा॰ अहोतिबलवाञ्जनसंमर्दः शैब्या सवैक्कुव्यं किणधमंअज्जाकिणधइत्यादिपठ-
ति बालः मंपीति उपा॰ दृस्वासाश्चर्यं कथमियंसाभवति कीदृशास्तेसमयः शैब्यः परस्सुरिसेत्यादिपठति उपाध्यायःसहर्षं स्फु-
टुखल्वयंतेसमयः तदमुनैवसमयेनास्मद्गृहेविश्रम्यतां पत्नीममाग्निपरिचर्यापराधीनतयासम्यक्गृहावेक्षाक्षमानकृत्यतांस्फु
वर्णं शै॰ सहर्षं अणुगिह्निदह्मिजंअज्जोआणवेदि(अनुगृहीतास्मि यदार्यआज्ञापयति)उपा॰ चिरमवलोक्य सविस्मयमात्मग
तं शिरोयदवगुंठितंसहजरूढलज्जाननंयतंचपरिमंथरंचरणकोटिलक्ष्येदृशो वचः परिमितंचयन्मधुरमंदमंदाक्षरंनिजंतादियमं-

ईदृशीमेसमयः, १किंभणथ कस्त्वाममुनासमयेनक्रेष्यतीति तद्गच्छतप्रसीदतकिंयुष्माकमनेनप्रयोजनं द्विजवरोदीनजनानुकंप्यन्योवाकोपिसाधुर्मा
क्रेष्यति, २किमलीकमुपाध्यायोविज्ञाप्यते, ३उपाध्याययत्रैषगुरुकोजनसंमर्दोदृश्यतेतत्रतयाभवितव्यमितितर्कयामि,

For Private and Personal Use Only

गनावदनिनूनमुच्चैः कुलं २० साचिंतं नयुक्तमस्याकृतिविशेषस्येदमवस्थांतरं तत्कथामिमांदशामनुप्राप्ता भवत्वेवंतावत् अथिजीव
तिनेभर्ता शे॰ शिरसासंज्ञांददाति राजा, निश्वस्यात्मगतंकथंजीवति जीवनः किल कलत्रस्येदमवस्थांतरं उपाध्या॰ अपिसन्नि
हितः स्यात् शे॰ सास्रं राजानमवलोकयति उपा॰ दृष्ट्वासविस्मयं अयेकथमस्याभर्ताचिरंनिर्वर्ण्य सखेदं वृषस्कंधमत्ताद्विरदकर-
पीनायतभुजंवपुर्व्यूढोरस्कन्ननुभुवनरक्षाक्षममिदं तृणंमौलौचूडामणिसमुचितेकिंत्विदमहोनरवामारंभः किमिवनविधानाप्र-
हरति २१ उपसृत्य सास्रं भोमहात्मन् स्वदुःखसंविभागिनंमांकर्तुमर्हसि तत्कथ्यतांकिमर्थमेवंत्वयारब्धमिति राजा विचिंत्य
सवैक्लव्यमात्मगतंनयुक्तमस्यसाधोर्वचनमन्यथाकर्तुं प्रकाशं भोः साधोनविस्तारस्येदानींदेशकालोततः समासतः कथयामिश्रू-
यतां अहमस्वपीडितेनेदंमयाप्रारब्धमतः परंनमामतिनिर्बंधयितुमर्हसि उ॰ तेनाहिमतिगृह्यतांमेधनं राजा कर्णोपिधायभोः
साधोमथमवर्णवृत्तिरियंप्रतिषिद्धास्मद्विधानां तद्यदिमामनुकंपनीयंमन्यसेतन्मूल्यसंबंधेनदातुमर्हसि शे॰ ससंभ्रममुपग-
म्यसविनयमंजलिंबध्वा [1]णारिहदिमंपढमोवगदंअज्जोअदि क्कमिदुंताअणुगेह्लसमंएसाह्मिदेसरणगदा, उपा॰ सास्रं भ
वति लक्षार्धयदिदंहेम्नांयुवयोरेवतद्धनं परस्परानुरोधेनयद्युक्तंतद्विधीयतां २२ इतिधनमर्पयति शे॰ गृहीत्वासहर्षं
[2]दिठ्ठिआअध्यावसिदपडिण्णाभारोदाणिंअज्जउत्तोताकिदत्थह्मि उपाध्या॰ स्वगतंनयुक्तमिदानीमनयोर्वैक्लव्यमव-
लोकयितुमितिनिर्गंतुमिच्छति शे॰ [3]मुहुत्तअंपडिवालेदुअज्जोजावअज्जउत्तंसंसादिठ्ठंकरेमि उपा॰ भवतिएषकौंडि

१ नार्हतिमांप्रथमोपगतामार्योतिक्रमितुंतस्मादनुगृण्हीष्वमांमेषास्मितेशरणागता, २दिष्ट्यार्धावसितप्रतिज्ञाभारइदानीमार्यपुत्रस्तत्कृतार्थास्मि, ३मुहूर्तं प्रतिपालयत्वार्योयावदार्यपुत्रंसंसंदृष्टंकरोमि.

न्यस्तिष्ठतीतिनिष्क्रांतः शै० राज्ञःपटेधनंबध्वा [1]अणुमण्णदुमेएदस्सदिअवरस्सदासी त्तणंअज्जउत्तो, राजा. सवैक्लव्यं न-
न्वनुमतमेवप्रभवतोविधेः सोपालंभमात्मगतं आकाशे ननुभोहतविधे देवीभावंनीत्वापरगृहपरिचारिकाकृतायदियं तदिदंचूडार
त्नंचरणाभरणत्वमुपनीतं २३ सविशेषकरुणंभोः कष्टं ममविधिनिहतस्यमंदबुद्धेर्ध्रुवममुनाकृतदारविक्रयेण निजकुलपरि-
वादनम्रमूर्तेरपिसवितुर्मलिनीकृतामुरवश्रीः २४ आत्मानंसंस्तभ्यप्रकाशं प्रिये आराध्योयंब्राह्मणास्तेसशिष्यः पत्नीचास्यभी
तिदायोपचर्या रक्ष्याःप्राणाबालकःपालनीयोयद्यदैवंशास्तितत्ताद्विधेयं २५ शै० जंअज्जोआणवेदितिनिर्गंतुमिच्छंतीराजानमवलो-
क्यवैक्लव्यंनाटयति बटुः सकोपं ओअच्छभोदीआअच्छदूरंगदोउअज्झाओ, शै० सानुनयं मुहुत्तअंपडिवालेक्कमंजावअहं-
अज्जउत्तस्समुहंक्कादिट्ठंकरेमि, राजा वैक्लव्यंनाटयित्वा प्रियेविरम्यतांदुःखमास्तेब्राह्मणः शै० राजानमवलोकयंतीशनैः
परिक्रामति बालकः आवुकअहिंअंबागच्छति(आवुककुत्रांबागच्छति), राजा सखेदं यत्रतेपितुःकलत्रंभूत्वागम्यते बालकः
अडेवडुअकहिंतुमंअंबंणेदुमिच्छसि (अरेबटुककुत्रत्वमंबांनेतुमिच्छसि) इतिमातुःपटांतंधारयति बटुः सकोपं अवेहिगब्भ-
दास (अपेहिगर्भदास) इतिक्षिप्त्वापातयति बालकः साश्रुरभंगंपितरौपश्यति उभौसास्रमालोकयतः राजा भोब्राह्मणान-
परान्द्रांकिलशैशवंतन्नार्हस्येवंकर्तुं बालकमुत्थाप्याघ्रशिरस्याघ्रायालिंग्यन्च सवैक्लव्यं किंवत्समन्युभरविस्फुरितनाधरोष्ठः पापस्य-

१ अनुमन्यतांमेएतस्यद्विजवरस्यदासीत्वमार्यपुत्रः, २ आगच्छभवतिआगच्छदूरंगतउपाध्यायः, ३ मुहूर्तंप्रतिपालयत्वंयावदहमार्यपुत्रस्यमुखंस्प
ष्टंकरोमि.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्यसिसुखंममनिर्घृणस्ययेषांप्रियानाशिशवःपिशिताशनानांतेषामपिप्रियतमावनितानिरस्त्रां २६ तत्किंमांचांडालमनुगच्छसि
मातरमेवानुगच्छ इतिवैक्लव्यंनाटयति शैब्या. अज्जउत्तकिंममंदभाइणिंअणुसोअंतोमहेसिणोकज्जंसिढिलेसि, इतिबालकं
गृहीत्वा परिक्रामति बालकः आवुकपारि ताहि२ इतिनिष्क्रांतः राजा चिरमवलोक्यहाहतोस्मीतिपातयत्यात्मानं ततःप्रविश
तिकौशिकः आःकथमद्याधुनापिनमेसंभृतानिदक्षिणासुवर्णानि राजा श्रुत्वास संभ्रमंउत्थायभगवन्गृह्यतांतावदर्धं कौ॰
आःकृतमर्धेनयादिमातिश्रुतमवश्यंदेयंमन्यतेभवान्तान्निःशेषमेवप्रयच्छ नेपथ्ये धिक्तपोधिग्व्रतमिदंधिग्ज्ञानंधिग्बहुश्रुतं
नीतवानसियद्ब्रह्मन्हरिश्चंद्रमिमांदशां २७ कौशिकः श्रुत्वासक्रोधं आःकेपुनरमीधिक्शब्देनमांगर्हयंति ऊर्ध्वमवलोक्य अ-
येकथममीविमानचारिणोविश्वेदेवाः क्रोधंनाटयित्वा कमंडलुवारिणोपस्पृश्य शापजलंगृहीत्वाधिगनात्मज्ञाअरेरेक्षद्रक्ष-
त्रियपक्षपातिनः पंचानामपिवोजन्मक्ष त्रयोनोभविष्यति तत्रापिब्राह्मणोद्रौणिःकुमारान्वोहनिष्यति २८ पुनरूर्ध्वमवलो
क्य सहर्षं अयेकथममी महदृष्टिपातभयकंपितलोलघंटाटंकारपूरितवियत्स्खलतोविमानात् वल्गत्ध्वजांशुकविदष्टकिरीटको
टिभ्रष्टकुंडलमवाङ्मुखमापतंति २९ राजा ऊर्ध्वमवलोक्य सभयं अहोप्रभावस्तपसांस्थानेखलुक्लिश्यतिहरिश्चंद्रः भ
गवन्नलमन्यथासंभावितेन गृह्यतामर्जितमिदंभार्यातनयविक्रयात् शेषस्यार्थेकरिष्यामिचांडालेप्यात्मविक्रयं ३० कौशि॰
सक्रोधंकृतमर्धेन नन्वशेषमेवदीयतां राजा भोःसाधवः केनापीत्यादिपठति ततःप्रविशतिचांडालवेषः सानुचरोधर्मः२ १३
१ आर्यपुत्रकिंमांमंदभाग्यामनुशोचयन्महर्षेः कार्यंशिथिलयसि.

स्वगतं मयाधियंतेभुवनान्यमूनिसत्यंन्चमॉनत्साहितंबिभर्ति परीक्षितुंसत्यमतोस्यराज्ञः कृतोमयाजातिपरिग्रहोयं ३१ चिरंध्या-
त्वासाश्चर्यं प्रणिधानतोप्यहं पश्यन्नस्यराजर्षेर्हरिश्चंद्रस्यतुल्यंनपश्यामि भवतु तत्सकाशमेवगच्छामि परिक्रम्य प्रकाशं अं-
डेसालमेअकागेहिदेतुएअ त्थपे हालके अनुचरः मेहद्दलआकिंतएस्रवण्णागालेकाद्न्वेआडस्मूलेपाद्व्वे धर्मः अडेतवकिंइ-
मिणास्रणिदेण, इतिपरिक्रामति राजा केनापीत्यादिपठति लक्षार्धेनेत्यादिच सर्वतोवलोक्य सखेदं कथंमयामंदभाग्येनन-
कश्चिदर्थी हाहतोस्मीतिमूर्च्छितःपतति धर्मः आकर्ण्य दृष्ट्वास्वगतं कथमसोमहासत्वोमोहमुपगतस्तिष्ठति भवत्वेवंतावत् स-
संभ्रममुपगम्य प्रकाशं अडेउ त्थेहिअहकेतुएअ त्थीतागेण्हएदंजधाप थिदंस्रवण्णं राजा सहर्षमुत्थायभोःसाधोउपनीय-
तां२ दृष्ट्वासविषादं भद्रभवानर्थी धर्मः बाढंअहकेतुएअथ्थी (अहंतवार्थी) राजा तत्कोभवान् धर्मः सव्वमसाणाधिवइगुल्म
द्वाधिआडपच्चइदबहु ठाणाणिउत्तचंडालमहत्तल्लेहके, राजा सावेगमपसृत्य कौशिकस्यपादयोर्निपत्यभगवन्प्रसीदप्रसीद
तवैवदासतांगत्वावरमानृण्यमस्तुमे नदृष्टानश्रुतान्वेयंप्रसंश्चंडालदासता ३१ कौशिकः धिङ्मूर्ख स्वयंदासास्तपस्वि
नस्तत्किंत्वयादासेनमेक्रियते राजा सानुनयं भगवन्यदादिशासितत्करिष्ये को० श्रृण्वंतुविश्वेदेवाः यदादिशामितत्करोषि
राजा बाढंकरोमि को० यद्येवमस्मिन्नेवार्थिनिविक्रीयात्मानंप्रयच्छमेदक्षिणास्रवर्णानि राजा सवैक्लव्यमात्मगतं अहहका-

१ अरेसारमेयकगृहीतस्त्वयार्थपेहालकः, २ अरेतवकिमनेनश्रुतेन, ३ अस्तुनिष्ठाहंत्वयार्थीतत्गृहाणेदंयथाप्रार्थितंस्रवर्णं, ४ सर्वश्मशानाधिप
तिर्गुल्मस्थानाधिकारप्रत्यायितबहुस्थाननियुक्तश्चंडालोहं,

गतिरिदानीं प्रकाशं भगवन्यदादिशसि चंडालमुपगम्य भोःस्वजातिमहत्तरसमयेनमांक्रेतुमर्हसि चंडा॰ अथकीदिसेदे
शमए(अथकीदृशस्तेसमयः)राजा श्रूयतां भैक्ष्याशी दूरनास्तिष्ठनृरथ्यांबरपरिच्छदः यद्यदादिशातिस्वामीनत्करोम्यविचा
रयन् ३३ उभोसपरितोषं अंडेस्कष्ठुएसेतेसमए गेण्हएदंस्कवण्णं, इतिदूरादर्पयति राजा गृहीत्वासहर्षं अनृणस्यममे
दानीमशमस्यद्विजातिना अपरिभ्रष्टसत्यस्यश्लाघ्या चंडालदासता ३४ कौशिकंप्रतिसानुनयं भगवन्प्रतिगृह्यतामिद
मशेषंधनं कौ॰ सवेलक्ष्यं दास्यासि राजा सानुनय भगवन्गृह्यतां कौ॰ परिगृह्य स्वगतं किमतःपरंनिर्बंधेनभवतु
गच्छामि सवेलक्ष्यंतथाकरोति राजा सविनयमंजलिंबध्वा भगवन्कालक्षेपकृतस्त्वपराधोमांप्रतिमर्षणीयः कौ॰ क्षांत-
मितिनिष्क्रांतः राजा चंडालमुपगम्य भोःस्वजातिमहत्तरक इत्यर्धोक्तेमुखमावृणोति भोःस्वामिन्नाज्ञापयकिंमयादासेन
कर्तव्यं धर्मः सपरितोषमात्मगतं यन्नदृष्टपूर्वंनवाश्रुतपूर्वंकर्म प्रकाशम् अंडेदक्षिणमसाणंगदुअमिडअचीडहाड-
केणभविअअहोल त्तंजग्गिद व्वंअहंपिस्सभवणंजेव्वगच्छामि राजा यथाज्ञापयतिस्वामी इतिनिष्क्रांताःसर्वे इति-
आर्यक्षेमीश्वरकृतेचंडकौशिकनाटकेतृतीयोंकः ३ ५ ५ ५ ५ ५ ५
ततःप्रविशतिचंडालाभ्यामनुगम्यमानः सचिंतोराजा चंडालौ ओशलधअज्जाओशलधणहोइएशेवज्झेताकिंएत्थ-

१ अरेस्कष्ठेषतेसमयः गृहाणेदंस्कवर्णं, २ अरेदक्षिणस्मशानंगत्वामृतकचीरहारकेणभूत्वा होरात्रंजागर्तव्यंअहमपिस्वभवनमेवगच्छामि, ३ अप सरतार्याः अपसरतनभवत्येषवध्यस्तत्किमत्रपश्यथ,

१४

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पेक्खध आकर्ण्याकाशे अज्जा[1]किंभणधकेएशेकहिंवाणीअदिति एशोकिलनवश्शीशामिणोमहद्दलश्शशआशादेबहुदलंश्आवण्
णअंगेण्हिअदाशन्तणंपडिवण्णेतालक्खणाणिमिन्नंदक्खिणमसाणंणीअदि, राजा निश्वस्यात्मगतंकष्टमनवधिरयंयथोत्तरदारु
णोमेव्यसनपरंपरापातः तथाहि इदमस्यममश्वपाकदास्यंवसतिर्घोरतरंमहाश्मशानं मृतकंबलहारितावकर्मपरिशांतंव्यसनेषहो
नदेवं १ सोत्कंठ्यं स्फुरवल्विदमुच्यते दुःखंदुःखेोस्तिरोधीयतइति यतोदाक्षिणानृण्यानिर्वृत्तमामिदानींपुनर्दास्यशोकोबाधते
वैक्लव्यंनाटयित्वा किंशोच्चामिमदेकबांधवतयासंप्रत्यनाथाः प्रजाःकिंबंधूनतिवत्सलानशरणान्किंतांश्चभृत्यानहं किंदासींद्विजस
द्मनिप्रियतमांवत्संचकिंवाशिशंकिंचंडालभुजिष्यतामुपगतःपापोनिजंजीवितं २ स्मृतिमभिनीय सखेदं दुराराध्येतस्मिन्परम
तपसांधामनितदामुनोविश्वामित्रेकथमपियदानृण्यमभवत् तदाक्षिसंहृत्वाप्ररुदितमुखंबालतनयंतदंतःशल्यंमांव्रणमिवविरूढं-
ग्लपयति ३ चांडालो पुन स्तदेवपठतः राजा विचिंत्यसखेदमात्मगतं अहहहृदंपीडयतिमांसंप्रतितद्यत्तदा त्वरयतिगुरो
र्भक्त्यातस्मिन्द्विजन्मनिरोषणेरुदतिच्चनदाक्षिसेबालेपदांननिरोधिनि विधृतविधृतैर्बाष्पोत्पीडैर्जडीकृततारकाकथमपितया
क्रूरेदृष्टिश्चिरान्मयिसंहृता ४ सवैक्लव्यं हादेवि यादितपनकुलोचितावधूस्त्वंयादिविमलेशशिनःकुलेप्रसूतामयिविनिपतिता-
सिभस्मराशौकृतनुघृताहुतिवत्तदाकथंनु ५ अपिच राजपुत्रि उपनतनवमालिकाप्रसूनैःस्रजमपियापरिखिद्यसेसृजंती
परिजनवनितोचितानिकर्माण्यपरिचितानिकथंविधास्यसित्वं ६ चंडालो अडेयाादिदूरेदक्खिणमसाणेतातुलिअआअच्छ,

[1] आर्यःकिंभणथकएषकुत्रवानीयतइति एषकिलतपस्वीस्वामिनोमहत्तरस्यसकाशाद्बहुतरंसुवर्णंगृहीत्वादासत्वंप्रतिपन्नः तस्माद्रक्षणानिमित्तंदक्षिणश्मशानंनीय
ते, [2] अरेनातिदूरंदक्षिणश्मशानंतस्मात्त्वरितमागच्छ,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजा दृष्ट्वा सावष्टंभं अयं कथमिदं तन्महाश्मशानं तथाहि विदूरादभ्यस्तैर्दियानि बहुशो मंडलशतैरुदंचत्पुच्छाग्रास्तिमितविततैः पक्षतिपुटैः पतंत्येते गृध्राः शवपिशितलोलानन गुहागलल्लालाक्लेदस्थगितनिजचंचूभयपुटाः ७ नेपथ्ये कलकलः राजा कर्णं दत्वा अवलोक्य च अहो बीभत्सरौद्रता महाश्मशानस्य तथाहि इमा मूर्छंत्येतः प्रतिरवभृतः कर्णकटवः शिवाः क्रूराक्रंदैरा शैव पटहाडंबररवाः ज्वलंत्येते तापस्फुटितनृकरोटीपुटदरीलसन्मास्तिकाक्ताः श मि तजाटिला ग्राहुतभुजः ८ अग्रतोवलोक्य सश्लाघं अहो बीभत्समपि स्पृहणीयमिदं वर्तते भद्र कुणप सर्वस्वग्राहिभिः प्रणायिभिः श्वश्वापदगणैर्यथेष्टमुपभुज्यमानो धन्यस्त्वमसि तथाहि भिनत्यक्ष्णोर्मुद्रां सिरसि चरणोन्यस्य करटः शिवा सृक्कोपांते ग्रसति रसनाग्रं विलुठितं छिनत्ति श्वा मेंद्रं प्रथयति च गृध्रोंत्र विवरं यथेष्टव्यापारास्त्वयि कुणप यत् श्वापदगणाः ९ अहो निःसारता शरीराणां तन्मध्यं तदुरस्तदेव वदनं तेलोचने ते भ्रुवौ जातं सर्वममेध्यशोणितवसामांसास्थिजालामयं भीरूणां भयदं त्रपास्पदमिदं विद्याविनीतात्मनां तन्मूढैः क्रियते वृथा विषयिभिः क्षुद्रोभिमानग्रहः १० चंडालयोरेकः अग्रतो दृष्ट्वा अंडे पडवेह्म एदं तुंगतलुसिहडवासिणिं भअवदिं चंडकच्चाइणिं, अपरः[1] ऐवं कलेह्म, तथा कृत्वा[2] णिम्महिअचंडमत्तिएमहिशमहाशरुडाभिण्णगत्तिएकच्चाइणिगजच्चम्मवत्ति एलस्खवरमंचंडसूडइत्थिए,[3] राजा सर्वतोवलोक्य सविस्मयं अहो बीभत्सोपचारप्रियत्वं कात्यायन्याः तथाहि जरन्निर्माल्याढ्यामृतमहिषगोकंठलुठिताः प्रलंबंते घंटाः श्र

१ अरे भणवाव: एतां तुंगतरुशिखरवासिनीं भगवतीं चंडकात्यायनीम्, २ एवं कुर्वः ३ निर्मथितचंडमस्तके महिषमहासुरभिन्नगात्रके कात्यायनि गजचर्मवस्त्रके रक्ष मां चंद्रचूडस्त्रि,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वणकटुटंकारपटवः तरुस्तंभेदेव्याः कृतरुधिरपंचांगुलितलेरटंत्येतेयस्मिन्प्रकृतिबलिलोलाबलिभुजः ११ सप्रणाममंजलिंबध्वा भ-
गवति चिंडिमेनेप्रेतविमानप्रियेलसत्प्रेते प्रेतास्थिरौद्ररूपेप्रेताशिनिभैरविनमस्ते १२ नेपथ्ये कलकलः राजा आकर्ण्य अहोना
नादिगंतपातिनांस्वनीडपर्युत्सुकानांदिवसावसानशंसिनांसंरावणांविहंगानां प्रतीचींदृष्ट्वा नकस्यचिन्नामनदुरतिक्रमादेवपरिपा
टी तथाहि अयमसौगगणनागणदीपकस्तरलकालभुजंगशिखामणिः क्षणाविडंबितवाडवविग्रहः पततिवारिनिधौविधुरोरविः १३
समंतादवलोक्य सविस्मयं संध्यावत्थ्यारुणशोणंतनुदहनचितांगारमंदार्कबिंबंतारानारास्थिकीर्णविशदनरकरंकायमाणोज्वलेंदु
दृष्यन्नक्तंचरौघंघनतिमिरमहाधूमधूम्रानुकारंजातंलीलास्मशानंजगदखिलमहोकालकापालिकस्य १४ चंडालौ दृष्ट्वा क
थं(कथं) [1]अस्तंगच्छदिसूलेवइझट्ठाणंगदेजधावइझे,एसेतमसंघाडेचंडालकुलंवओछरेदि, राजा सर्वतोवलोक्य सावष्टं-
भं अहोअतिगभीरभीषणाःसंप्रतिवर्ततेस्मशानशाखिनः तथाहि आस्कंधादुत्पतंतःपृथुकुहरगृहद्वारिकूजंत्युलूकाधुन्वं-
तः पक्षपालीःप्रबलकिलकिलामूर्ध्निगृध्राःपतंति शाखाग्रालंबिशीर्यत्कुणपघनवसागंधमाघ्रायरौद्रंक्रंदंतःस्फारयंतिस्फुरदनल
शिखाःफेरवःफेत्कृतानि १५ एकः जनांतिकं [2]अडेविविधवेताडसंकुडेएसेदक्खिणमसाणेतासिग्घं२गच्छह्म, अन्यः [3]एवं
करेह्म, उभौ प्रकाशं [4]अडेमहद्दडअस्सआणाएएदंमशाणंआहिंडंतेनअहोरत्तंतुएअप्पमत्तेणचिट्ठिदव्वं राजा सहर्षं

1 अस्तंगच्छतिसूर्योवध्यस्थानंगतोयथावध्यः एषतमःसंहारश्चंडालकुटुंबकोवतरति, 2 अरेविविधवेतालसंकुलएषदक्षिण स्मशानस्तस्माच्छीघ्रं गच्छा-
वः, 3 एवंकुर्वः, 4 अरेमहत्तरस्याज्ञयैतत्स्मशानमाहिंडमानेनाहोरात्रंत्वयाअप्रमत्तेनस्थातव्यम्,

For Private and Personal Use Only

एवंयदादिशतिस्वामी नेपथ्ये कलकलः चांडालौ सभयं ह्रीमादिकेसमुत्थितेनिशाकडेनासिध्यं २ पडाअह्म, इतिनिष्क्रांतौ रा
जा सावष्टंभं परिक्रम्य दृष्ट्वा अहोबीभत्सदर्शनाः कौणपनिकायाः तथाहि जरत्कूपाकारैर्नयनपरिवेषैस्तनुशिराकरालोच्चैर्घो-
णाःकुटिलरदनाःक्रूरवदनाः अमीनाडीजंघाद्रुमकुहरनिम्नोदरभुवोघनस्नायुच्छन्नंस्थपुटघटनांबिभ्रतिवपुः १६ सकौतुकम
वलोक्य अहोक्रीडाकलहकौशलंपिशाचानां तथाहि पिबत्येकोन्यस्माद्धृनरुधिरमाच्छिद्यचषकंज्वलज्जिह्वोवक्त्राद्गलितमपरो
लेढिपिबतः नतस्त्यानान्कश्चिद्भुविनिपतितांच्छोणितकणान्क्षणादुच्चैर्ग्रीवोरसयतिलसद्दीर्घरसनः १७ सकौतुकमवलोक्य स
स्मितं अहोनुखलुभोः परिहासइवदुर्विदग्धानांकेलिरपिरसांतरमालंबतेयातुधानानां तथाहि क्रूरम्यःसंभोगोमृदुमधुरन्वेष्टांगल
लितःकटाक्षाःक्रान्योन्यंमलयावितनतोल्काद्युतिभृतः क्वदंष्ट्रासंघट्टज्वलितदहनस्त्रुंबनविधिर्घनाश्लेषः क्वायंप्रतिरसदुरःपंजररवः
१८ सघृणमवलोक्य धिगतिबीभत्समेतत् चिताग्नेराकृष्टंनलकशिखरप्रोतमसकृत्स्फुरद्भिर्निर्वाप्यप्रबलपवनैःफूत्कृतशतैः शि
रोनारंभेतःकवलयतितृष्णावशललत्करालास्यःप्रुष्यद्दनकुहरस्तूद्गिरतिच १९ स्मृतिमभिनीय अलममीषांदर्शनकुतूहलितया
तद्यावत्स्वाम्यादेशमनुतिष्ठन्परितःश्मशानमेवपर्यटामि परिक्रम्य दृष्टिमभिनीय अहोगभीरतानिशीथिन्याः तथाहि मुष्टि-
ग्राह्यंतिमिरमभितो निन्हुतेदिग्विभागंपादन्यासःस्खलतिविषमेनिष्फलादृष्टिपाताः धाराभिन्नांजनगिरिस्फुटद्दलुसवर्णांतर
त्वाल्लुब्धाहंतःस्फुरतिपरितोनीलिमैवैकतानः २० भवत्त्वेस्तावद्व्याहरामि कःकोत्रभोः श्रूयतांममश्मशानाधिपतेःस्वामि १६

१ हामातृकेसमुत्थितोनिशाकरस्तस्माच्छीघ्रं २ पलायावः,

नोव्या हारः अकृत्वामत्परिज्ञानमदत्वामृतकंबलं भवर्तनीयाः केनापिनश्मशानोचिताःक्रियाः २१ तदद्यप्रभृति एतत्तथांत
करणीयमिहाप्रमत्तैराज्ञाव्यतिक्रमसहः किलनास्मिभर्तुः ब्रह्मेंद्रवायुवरुणप्रतिमोपियःस्यात्तस्याप्ययंप्रतिभटोस्तुभुजोमर्दा-
यः २२ कथंकश्चिन्नव्याहरति भवत्वन्यतोव्याहरामि परिक्रम्य कःकोत्रभोः नेपथ्ये अहमहंभोः राजा सावष्टंभं कथंप्रतिव्या
हारः भवतु शब्दानुसारेणोपगम्यनिपुणमवधारयामि, कोयमिति परिक्रम्य नेपथ्याभिमुखमवलोक्यच सविस्मयं अथको
यं खट्वांगधृग्भस्मकृतांगरागोनरास्थिभूषोज्वलरम्यकांतिः कपालपाणिर्नृकरंकमौलिराभातिसाक्षाद्विभूतनाथः २३ ततःप्र
विशतिकापालिकवेषोधर्मः अहमहंभोः अयाचितोपस्थितभैक्ष्यवृत्तिर्निहत्तपंचेंद्रियनिस्तरंगः व्यतीत्यसंसारमहाश्मशानंचरा
म्यत्रीभत्समिदंश्मशानं २४ विचिंत्य स्थानेखलुसरुद्रोभगवान्महाव्रतंचचार परःकिलायंप्रकर्षःकामचारिणां किंतु भैक्ष्याहे-
तंनपोर्हेतंक्रियार्हेतंचतत्परं फलभंसर्वमेवैतदात्मार्हेतंतुदुर्लभं २५ समंतादवलोक्य साशंकमात्मगतं मयाधियंतेभुवनान्य
मूनिसत्यंचमांतत्साहितंबिभर्ति परीक्षितुंसत्यमतोस्यराज्ञःकृतोमयावेषपरिग्रहोयं २६ विचिंत्य साश्चर्यमात्मगतं आश्चर्यं
दुःखपरंपरास्वशोच्यमानस्यराजर्षेर्हरिश्चंद्रस्यचरितं अथवाप्रकृतिरियंमहात्मनां कुतः सुखंवादुःखंवाकिमिवहिजगत्यस्ति
नियतंविवेकप्रध्वंसाद्भवतिसुखदुःखव्यतिकरः मनोवृत्तिःपुंसांजगतिजयिनीकापिमहतांययादुःखंदुःखंसुखमपिसुखंवा
नभवति २७ भवतुतत्सकाशमेवगच्छामि परिक्रम्यदृष्ट्वा सश्लाघं अयेअयमसौमहात्मा तदुपसर्पामि
तथाकृत्वा भोःराजन्नुसिद्धिभाजनंभूयाः राजा स्वागतंमहाव्रतचारिणोनैष्ठिकस्य कापालिकः भोःराजन्नर्थिनोवयंभवं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमुपागताः राजा लज्जांनाटयति कापा॰ अलंव्रीडया योगचक्षुषोहिवयंविदितवृत्तांताएवभवतः तथाप्येवमवस्थस्या-
पितेननःसमीहितदानेदारिद्र्यं तथाहि परेषामुपकारायनकथंचिन्नसाधवः कुहूमपिसमासाद्याधिनोतींदुर्वनस्पतीन् २८
तदवधत्तांभवान् राजा अवहितोस्मि कापा॰ वेतालवज्रगुटिकांजनपादलेपदेत्यांगनाविधिरसायनधातुवादाः तच्चिंत्यनांक-
रनलोपगतामभैतेविघ्नैः पटैरिवयथानतिरस्क्रियंते २९ तदादिश्यतांविघ्नप्रत्यूहइति राजा भोःसाधकयोगबलाज्ज्ञानात्येव
भवानस्वाधीनमिदन्नःशरीरकंतत्स्वाम्यर्थाविरोधनः प्रयातिष्ये का॰ भोराजन्कुतोत्रस्वाम्यर्थविरोधः नन्वाज्ञामात्रसंपा-
द्यंनःसमीहितंभवतः तदितोनातिदूरेसिद्धरससान्निध्यानमस्ति तद्यदास्माभिरारंभणीयमस्ति भवतापुनरिहस्थेनैवविघ्नप्रत्यूहं
प्रतिसावधानेनभवितव्यं इतिनिष्क्रांतः राजा सावष्टंभंसर्वतःपरिक्रम्य प्रोत्सरत२विघ्नाःसर्वथाप्रतिहतोवःप्रसरः नेपथ्ये रा
जन्यथाआज्ञापयसि श्रेयांसिविवृतद्वाराण्यद्यविद्याः स्वयंवराः सिद्धयःकामचारिण्यस्त्वदाज्ञांकोतिवर्तते ३० राजा स्मृत्वास
हर्षं दिष्ट्यातथेतिप्रतिपन्नमस्मद्वचनंविघ्नैः प्रियंनः२ ततःप्रविशंतिविमानचारि पयोविद्याः२ सहसोपसृत्य राजन्हरिश्चंद्रादिष्ट्यावर्ध-
से तथाहि पश्य त्वय्यन्वेष्टतराजन्येक्रुद्धोयद्वारुणोमुनिः विद्यास्त्वद्विपदांमूलंतावयंसमुपस्थिताः ३१ राजा हस्वासाश्चर्यमा-
त्मगतं कथमिमास्ताभगवत्योविद्याः यास्तभगवतोविश्वामित्रस्यापितीव्रैस्तपोभिरवसन्नं प्रकाशं अंजलिंबध्वा नमस्त्रिलो
कविजयिनीभ्योविद्याभ्यः विद्याः राजन् त्वदायत्तावयंअतस्त्वंशाधिनः राजा यदिमामनुग्राह्यंभवत्योनुमन्यंते ततोभग-
वंतंकौशिकमुपतिष्ठध्वं ततोनपराद्धंमुनेरात्मानंसमर्पयामि विद्याः सविस्मयंपरस्परमवलोक्य राजन् एवमस्तु इतिनि-



For Private and Personal Use Only

क्रांताः ततः प्रविशतिस्कंधारोपितनिधानेनवेतालेनानुगम्यमानः कापालिकः२ सहसोपसृत्य राजन्दिष्ट्यावर्धसेसंसिद्धरसस्यास्य
महानिधानस्यलाभाभ्युदयेनतदुपयुज्यतांभगवान्रसेंद्रः यस्योपयोगादवधूयमृत्कमासाद्यसद्योमरलोकमार्गं आरूढकल्पद्रुम-
मंजरीणिशिरांसिमेरोर्विहरंतिसिद्धाः ३१ राजा ननुदासभावविरुद्धमेतत् एवंकिलवंचितःस्वामीस्यात् कापा० साश्चर्यमात्म
गतं भवत्वेवंतावत् प्रकाशं यद्येवंगृह्यतांसकलत्रस्यात्मनोनिष्क्रयायैतन्महानिधानं राजा कथमेवंभविष्यति यतोऽधनंदासभावं
मन्यंते स्वाम्यार्थनस्कनेदंप्रत्याख्यानमर्हति इत्यनुमतएवायंभवतःसंकल्पः तत्प्राप्यतांस्वामिनोनिभृतंसर्वमिदंमहानिधानं का०
साश्चर्यमात्मगतं अहोधैर्यमहोज्ञानमहोमहानुभावताच अथवा चलंतिगिरयःकामंयुगांतपवनाहताः कृच्छ्रेपिनचलत्येवधीरा-
णांनिश्चलंमनः ३३ तन्ममापिकिमतिनिर्बंधेन प्रकाशं वेतालंप्रतिभद्रगम्यतांक्रियतामस्यराज्ञः समीहितं वेतालः सप्रणामं जंसा
धओआणवेदि इतिनिष्क्रांतः कापा० समंतादवलोक्य भोराजन् प्रभातप्रायावर्ततेविभावरी तत्साधयिष्यामस्तावत् राजा
भोसाधकस्मर्तव्यावयंदुःस्थितकथासु कापा० राजन्देवतास्त्वांस्मरिष्यंतीतिनिष्क्रांतः राजा प्राचीमवलोक्यसप्रसादं अयेक
थं तमोनिर्भिद्यगहनंसंध्यारुणपुरःसरः अनुग्रहायलोकानामुदेत्ययमहर्पतिः ३४ तद्यावदहमपिभगवतीभागीरथीतीरमुप
गम्यस्वाम्यादेशमनुतिष्ठामि इतिनिष्क्रांताःसर्वे इतिआर्यक्षेमीश्वरकृतेचंडकौशिकनाटके श्मशानचरितंनामचतुर्थोंकः ४ ६७
ततः प्रविशतिविकृतमलिनवेषोराजा सनिर्वेदं निश्वस्यकष्टंभोःकष्टं यद्दूरंमुनिसत्तमस्यसहृदांत्यागस्तथाविक्रयोदाराणांतनं
यस्यचेदमपरंचांडालदास्यंचयत् दुर्वाराणिमयाकठोरहृदयेनासानिमूढात्मनायस्यैतानिफलानिदुष्कृतमहोकिंनामतद्दारुणं१

१ यत्साधव आज्ञापयंति.

सवैक्लव्यं अहोबलवतीभवितव्यता कुतः मामानम्रशिरोधरंप्रभवताकुंडेनराज्यश्रियायाद्विश्लेषयतापितेनमुनिनानिःशेषि
तंनस्वयं तत्रापिव्यसनप्रियेणविधिनावृत्तंतथानिष्ठुरंयेनात्मातनयः कलत्रमपिमेसर्वंविलुप्तंक्षणात् २ चिंतांनाटयित्वा दीर्घंच
निश्वस्य सवैक्लव्यं अहहशोचंतीरजनीषुदैन्यविधुरानूनंकृशांगीमयाकर्तव्यंकिलचिंतयंत्यनुदिनंसानिश्चयंचेतसा प्राणानामव
लंबनंचकुरुतेभूयोपिमेसंगमेहाकष्टंयदिमांदशामुपगतंपापंनसावेत्तिमां ३ निश्वस्य हावत्सरोहिताश्व धात्रीजनांकशनदुर्ल-
लितः कथंनुभूमौचिरंलुठसिवत्साविरूढनिद्रः त्वामद्यपार्थिवशतैरभिनंदिताज्ञमाज्ञापयंतिबटवः श्रुतदुर्गरूढाः ४ चिरंविचिंत्य
सकरुणं सज्जोमौलिस्यंपततुविपदस्तासांकृतंस्वागतंयत्सत्यंकृतकृत्यकस्थमनसांतुल्याविपत्संपदा वत्सत्वंतुदुनोषिमेघहृद-
यंयेनांकशय्योचितः क्रूरेणाकृतकृत्यएवसहसादष्टोसिदेवाहिना ५ साशंकं शांतंपापं प्रतिहतममंगलंवत्सस्य क्रूरेणाकृतकृ
त्यएवगमिनोदैवेनकष्टांदशां वामाक्षिस्पंदनंसूचयित्वा दक्षिणभुजस्फुरणंच सहर्षं स्पंदतेवामनयनंबाहुःस्फुरतिदक्षिणः
व्यसनाभ्युदयौभासाविदंकथयतीवमे ६ विचिंत्याथवाकिमद्यापिव्यसनोदयचिंतया पर्याप्तःखलुदुरात्माहरिश्चंद्रहतकः तथा
हि अतः परंयद्व्यसनंनूनमभ्युदयोहिसः पापस्याभ्युदयद्वारमिदानीमरणंहिमे ७ प्रविश्यापटाक्षेपेणचांडालः २ १अडेकदस्स,
राजा साशंकं भद्रकिंकृतस्य चंडालः २अडेएव्वंभणामि जधाकधस्सवल्लभस्सपासपडिवत्तिणीइत्थिआकलुणंकलुणंगेअंती
चिठ्ठदिनातुडिदं२गदुअगेण्हसेकड्कंबलंअहंपिशामिणोशकासंगच्छामि, इतिनिष्क्रांतः राजा परिक्रामति नेपथ्ये १८

१अरेकृतस्य, २अरेएवंभणामि यथाकृतस्यवल्लभस्यपार्श्वपरिवर्तिनीस्त्रीकरुणंकरुणंरुदतीतिष्ठतितस्मात्त्वरितंत्वरितंगत्वागृहाणास्याःशवकंबलं अहमपिस्वा
मिनः सकाशंगच्छामि,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हाजादकहिंसिदेहिमेपडिवअणं, राजा श्रुत्वासकरुणं अहहदारुणःप्रलापः ततःप्रविशतियथानिर्दिष्टावेकूव्यं नाटयंती शैब्या २ हाजादकहिंसिदेहिमेपडिवअणं इतिस्तंभंनाटयित्वाचिरंसंज्ञांलब्ध्वासास्रं हाजादणजुत्तंदाणिंजंपिदुणाविदेजधापरिच्चत्तातधातुमंपिमंमंदभाइणिंपरिच्चयसी, इतिमोहंनाटयति राजा श्रुत्वा अवलोक्यचसवैकूव्यं कथमियमपितनपस्विनीभर्त्रापरित्यक्तासर्वथासर्वत्रनिष्करुणताहतविधेः शैब्या ससंभ्रममुत्थायसव्यामोहं किंखुएदंवट्टईकहिंगदोमेपुत्तओ, इत्वापरिश्वज्य पुत्तकाकिंतिमंणालवसि एआइणीभाआमिक्खुअहंकिंणपेक्खसिएदंभीसणंमहामसाणं, सोन्मादं किंभणासि उवज्झाअस्सकालणादोकुसुमाइं अवचिणंतो कोडरादोणिक्कमिअकण्हाहिणादट्ठोह्मित्ति, ससंभ्रमं कहिंकहिंसोकण्हाहिकिंतिमंणदसेदि, समंतादवलोक्य अलिअंअलीअंकुदोएत्थकण्हाहीहाजादउत्थेहि २उवणेहिदावउवज्झाअस्सअरखंठिदाइंमालूरवत्ताइंतिलच्छेत्तसंभवाइंदभ्भंकुराइंअदिकामदिसे होमवेलापडिणिअत्तादाणिंसव्वेबह्मआरिणोहुविस्संति, उत्थापयितुमिच्छतीसावेगं कधंसच्चकंजेव्वमंमंदभाइणिंसमुज्झिअदूरंगदोसि हाहदह्मिमंदभाइणी, इतिमूर्च्छांनाटयति

१ हाजातकुत्रासिदेहिमेप्रतिवचनम्, २ हाजाततयुक्तमिदानींयत्पित्रापितेयथापरित्यक्तातथात्वमपिमांमंदभाग्यांपरित्यजसि, ३ किंखल्वेतद्वर्तते कुत्रगतोमेपुत्रकः, ४ पुत्रकाकिमितिमांनालपसि एकाकिनीबिभेमिखल्वहम्, किंनपश्यसिइदंभीषणंमहाश्मशानं, ५ किंभणस्युपाध्यायस्यकारणात्कुसुमानिअपचिन्वन्कोटरान्निष्क्रम्यकृष्णाहिनादष्टोस्मीति, ६ कुत्रकुत्रासौकृष्णाहिः किमितिमांनदर्शति, ७ अलीकमलीकंकुतोत्रकृष्णाहिः उपविश्य सकरुणं जातोत्तिष्ठोत्तिष्ठउपनयतावदुपाध्यायस्यारक्षितानिमालूरपत्राणितिलक्षेत्रसंभवानिदर्भांकुराणि अतिक्रामत्यस्यहोमवेला प्रतिनियुक्ताः इदानींसर्वेब्रह्मचारिणोभविष्यंति, ८ कथंसत्यमेवमांमंदभाग्यांसमुज्झित्यदूरंगतोसि हाहतास्मिमंदभाग्या,

राजा सवैक्लव्यं कष्टमकरुणस्यापितस्याविधेरमीस्फदुश्रवाव्याहाराः शैब्या संज्ञांलब्धा सोपालंभं [1]हाअज्जउत्तपेक्खवदा णिंअंकदुल्लहस्सपुत्तअस्ससंपदंअवत्थंतरं सव्वधाणिक्किवकहिंदाणिंवीसत्थहि अओन्चिट्ठसि अण्णंच तुएअहंसमादिट्ठाजं पअत्तदोपालणीओएसोदेवालओ तुंन्चमएपापसीलाएनधाणपरिवण्णं, राजा सविशेषकरुणं अहोमर्मस्प्राशिपरिदेविता नि शैब्या स्फनस्यमत्संगमवलोक्य [2]पुत्तकएदंखुमुद्धमिअंकभास्फरंनिडालवट्टं इमेस्फसिणिद्धपह्मलेपज्जंतपाडलेसिणिध्ध धवलेलोअणे अअंन्चस्फहाडिदाट्ठिबंधोकठिणावित्थिण्णवच्चत्थलोताकिंएत्थसरीरेअलक्खूक्खणंसंदिट्ठंकअंतहदएणतधास-च्चसंधस्सअज्जउत्तस्समममंदभाइणीएन्चरितेपमादो सव्वधाअआरणोधम्मोअप्पमाणंन्चलक्खणं अलिअवाइणोविण्णा णइत्तका जदोबहुसोदिट्ठपच्च एहिंसमादिट्ठम्हिबहुविअक्खवणेहिंजधावंसवद्धणोन्चक्कवत्तीसोपुत्तओदेभाविस्सदिति ता ममममंदभाएणीएभाअधेएहिंसव्वंअडिअंसंवुत्तं, राजा साशंकं कथंसंवादिनीकथावर्तते निपुणमवलोक्य सास्रं अयेकथं छत्राकारमिदंशिरः पृथुललाटांतंविशालेक्षणं चक्रांकोन्चरणौकरोसकमलावाजानुलंबौभुजो क्षाममध्यमुरोविशालमुदरंतुच्छं

१ आर्यपुत्रपश्येदानीमंकदुर्लभस्यपुत्रस्यसांप्रतमवस्थांतरं सर्वथानिष्कृपकुत्रेदानींविश्वस्तहृदयास्निष्टासि अन्यच्च त्वयाहंसमादिष्टायत्नयत्नतः पालनीयम् पत्तेबालकः तच्चमयापापशीलयातथानप्रतिपन्नं, २ पुत्रेतत्खलुतेमुग्धमृगांकभास्फरंनिटिलपट्टं इमेस्फस्निग्धपक्ष्मलेपर्यंतपटलेस्फस्निग्धधवलेलोचने अयंन्चस्फघटितास्थिबंधः कठिणाविस्तीर्णवक्षस्थलः तात्किमत्रशरीरेअलक्षणंसंदृष्टंकृतांतहतकेन तथासत्यसंधस्यार्यपुत्रस्यममममंदभाग्यायाश्च-रितेप्रमादःसर्वथाअकारणोधर्मोअप्रमाणंन्चलक्षणं अलीकवादिनोविज्ञानचिंतकाः यतोबहुशोदृष्टप्रत्ययैः समादिष्टास्मि बहुविचक्षणैर्यथा वंशवर्धन-श्चक्रवर्तीसोपुत्रकस्तेभविष्यतीतितन्ममममंदभाग्यायाभागधेयैः सर्वमलीकंसंवृत्तम्.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कटिःपीवरानूनंभूपकुलांकुरः शिशरयंसाम्राज्यचिन्हांकितः ८ स्मृतिमभिनीय सवेक्कृव्यं कष्टमियताकालेनवत्सोमेरोहिता
श्वोनूनमस्यामेववयोवस्थायांवर्ननेतदभिशंकतेमेहृदयं अथवाप्रतिहतममंगलंवत्सस्य शैब्या सोपालंभमाकाशे १भअवं
कोसिअकिदत्थोदाणिंसि, राजा सावेगं कथंभगवंतंकौशिकमुपालभते सर्वथानकिंचिद्विसंवदति तदलंपरपरिग्रहशंकया
शैब्येयं चिरमवलोक्य सकरुणंकृतमद्यापिसंदेहेनकुतः सावाणीकरुणार्तनादविकलाप्यामंद्रतंत्रीस्वनातच्चामीष्ठमरोघ
नीलकुटिलाःपर्याकुलामूर्धजाः तान्यंगानिकृशान्यमूनिसहसादुष्प्रत्यभिज्ञानिमेकांतिःसैवपुराणचित्रमलिनारेखाभिरु-
न्मीयते ९ हावत्स रोहिताश्व क्वासि देहिमेप्रतिवचनं इतिमूर्छितःपतति संज्ञांलब्ध्वा रोहिताश्वस्यमुखमवलोक्य अनु-
द्भिद्यमानदशनांकुरस्यस्मरामिशैशवंमंदभाग्यः प्रथितमंगलगुग्गुलुकल्पितप्रतनुलोलजटावलिमंडितं मधुपलंघितमुग्धस
रोरुहद्युतिमुखंतदिदंनविराजते १० हावत्सरोहिताश्वहातपनकुलबालप्रवालहाहरिश्चंद्रहृदयानंदनहाकुपितकौशि-
कदक्षिणानृण्यप्रधानपण्य नेष्टंनदत्तंनकुलोचितानिसुखान्यवाप्तानियशोनकीर्णं न्यग्रोधबीजांकुरमूषरस्थंविडंबयन्व-
त्सादिवंगतोसि ११ अपिच वत्स मूर्धाभिषेकपयसानपवित्रितस्तेदानैःकरोनचरणावरिमौलिपातैः जातोधनुर्गुणकि-
णांकधरोनबाहुलब्धोदयःप्रतिपदिंदुरिवासिनष्टः १२ तत्कथमिहोपसृत्य विलपंत्यादेव्याः कथयाम्यात्मानं अथवानयु
क्तमिमांनयशोकदह्यमानांतपस्विनींस्वदशाविपर्ययेणापरेणोद्दूयितुं आत्मानमवलोक्य दुरात्मन्हरिश्चंद्रहतककथ-

१ भगवन्कौशिककृतार्थइदानीमसि,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मद्यापिनम्रियसे किमनः परंद्रक्ष्यसीतिमूर्च्छांनाटयति शनैरुन्मील्य दुरात्मन्हरिश्चंद्रहतक यदेतानिदानीमपिहतप्राणान्नपरित्यजसि तत्किमात्मघातिनोलोकादात्मानंपरित्रातुमिच्छसि धिङ्मूर्ख वरमद्यैवनिर्मज्जन्नंधेतमसिदारुणे पुत्राननेंदुरहितानपुनर्वीक्षितादृशः १३ अपिच अंधतमःक्रकचभैरवपूयवीचीचंडासिपत्रवनरौरवशाल्मलीषु नैतेषुसंतिनरकेष्वपियाननास्तादुःखेनयास्तनयविक्लवजेनतुल्याः १४ तदलंविलंबेन भवतुभागीरथीतटोपांतेषुशोकाग्निदह्यमानमात्मानंनिर्वापयामि इतिमंदंपरिक्रम्य स्मृतिमभिनीय ससंभ्रमं अहहमनाक्पराधीनमात्मानंविस्मृतोस्मि विचिंत्य सवैक्लव्यं कष्टंभोःकष्टं मरणान्निर्वृतिंयांतिधन्याः स्वाधीनवृत्तयः आत्मविक्रयिणःपापाःप्राणत्यागेप्यनीश्वराः १५ वैक्लव्यंनाटयित्वा तदस्मादपिमनोरथाद्भ्रष्टोस्मि मंदभाग्यः कुतः दारुणस्यास्यदुःखस्यधैर्यमस्त्येवभेषजं दुर्वारविनिपातोयंभर्तुराज्ञाव्यतिक्रमः १६ सावष्टंभं तद्यावदिदानीमसह्यशोकाग्निदह्यमानमात्मानंविवेकवारिणासंस्तभ्यभर्तुराज्ञांप्रमाणीकरोमि यतः मध्येव्यक्तमनादिविभ्रमवशादव्यक्तमाद्यंतयोः पंचत्वंप्रकृतिः किलास्यजगतस्तत्पंचधासंभृतं संसारार्णववीचिभंगवलयैर्योगावियोगैः समास्तन्मोहादपरंनवेद्यविदुषांशोकस्ययत्कारणं १७ शैब्या संज्ञांलब्ध्वा कधंएदंहदजीविदंणमंपरिच्चअदिनाकिंणुखुएत्थकरणिज्जं, अश्रूणिप्रमृज्य [1]भोदुएदस्सिंमसाणपादवेअत्ताणअंउब्बंधिअवावादइस्सं, राजा दृष्ट्वा ससंभ्रमं अहहइदमपरमापतितंजीवितव्यसनफलं तत्किंकरोमिमंदभाग्यः विचिं

[1] कथमेतद्धतजीवितंनमांपरित्यजति तात्किंन्नुखल्वत्रकरणीयं, भवतुएतस्मिन्श्मशानपादपेआत्मानमुद्बध्यव्यापादयिष्यामि, इतिपाशंरचयति,



For Private and Personal Use Only

त्य भवत्वेवंतावत् इत्यन्यतोगत्वा मरणान्निर्वृतिंयांतिइत्यादिपठति उच्चैः स्वकर्मवैचित्र्यविपाकविभ्रमैर्विरूढमार्गाः परलोकभूमयः विहायजायामवशस्यभूरियंविहस्यतेसाकिलपारलौकिकैः १७ शैब्या आकर्ण्यससंभ्रमं पाशमुत्सृज्य [1]हद्धी-हद्धीमरणमहूसवासत्तहिअआएपराधीणजीविदाएदासत्तणंपिमएविस्समरिदं अण्णस्सिंपिजम्मंतरेइमादोदासभावादोणाविमुक्काभविस्सं, ऊर्ध्वमवलोक्य दीर्घनिःश्वस्य [2]भअवंदेव्वमरिदुंपिणलब्भादि भअवदोसआसादो नाहदह्मिमंदभाइणी, इत्यात्मानंपातयित्वा सहसोत्थाय अश्रूणिप्रमृज्य [3]किन्तिअंदाणिंअप्पदीआरदारुणेदसाविसंवादेपरिदेवीदव्वं, ता कालोचिदंकिदुअदासिन्नणससुनिदाएरुस्सूसा एदिअवरंआराधअंतीव्वदोववासणिअमेहिंअत्ताणअंपरिसोसइस्सं जधाणइमासिंमणुस्सलोएपुणोविसंभविस्संमंदभाइणी, इतिचिंतांरचयति राजा [4]हद्वासकरुणं अयेआरब्धमनयाकालोचितं स्वगतं साधुदेविसाधु नास्यामप्यवस्थायामतिक्रांतमाभिजात्यंनदहामिदानींसुपसृत्यभर्तुराज्ञांप्रमाणीकरोमि तथा-कृत्वा सर्वैर्कुर्व्यंसर्वेलक्ष्यंच देवीतिअर्धोक्तेमुखमावृणोति महाभागेअकृत्वामत्परिज्ञानमदत्वामृतकंबलं प्रवर्तनीयाः केनापिनश्मशानोचिताः क्रियाः १७ तदुपनीयतांमृतकंबलः इतिसबाष्पस्तंभंकरंप्रसारयति शैब्या भयंनाटयंती भद्दमुहदूरदोचिठ्ठ

१ हाधिक् २ मरणमहोत्सवासक्तहृदयया पराधीनजीवितयादासत्वमपिमयाविस्मृतं अन्यास्मिन्नपिजन्मांतरेस्माद्दासभावान्नविमुक्ताभविष्यामि, २ भगवन्देवमर्तुमपिनलभ्यतेभवतः सकाशात् नष्टनास्मिमंदभाग्या, ३ किमिदानीमप्रतीकारदारुणदशाविसंवादेपरिदेवितव्यं तत्कालोचितंकृत्वादासीत्वसमुचितयाशुश्रूषयाह्निजवरमाराधयंतीव्रतोपवास नियमैरात्मानंशोषयिष्ये यथानेतस्मिन्मनुष्यलोकेपुनरपिसंभविष्यामिमंदभाग्या,

४ भद्रमुखदूरतस्तिष्ठ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहंदेउवनइस्सं, राजा व्रीडांनाटयति शै० रोहिताश्वस्यशरीरात्पटमाकृष्यार्पयंतीहस्तंसमालोक्यसविस्मयमात्मगतं कथंचक्क
वत्तिलच्छणसणाहोविअअंपाणीइमस्सवावारस्सउवणीदो, अपसृत्यशनैः प्रत्यंगमालोक्यसप्रत्यभिज्ञानं कथंअज्जउत्तो
ससंभ्रमंहा अज्जउत्तपरित्ताहिपरित्ताहि, इत्यात्मानंपातयति राजा अपसृत्य देविनमांश्वपाकदास्यदूषितंस्प्रष्टुमर्हसि
तत्समाश्वसिहि२ शैब्या समाश्वस्य हद्धि२ किण्णेदं, राजा कर्मणांविपाकः तदलंपरिदेवितैः उपनीयतामेतत् शै०
सवैक्लव्यमर्पयति आकाशात्पुष्पवृष्टिः उभौसविस्मयमालोकयतः राजा कथमाकाशात्पुष्पवृष्टिः नेपथ्ये अहोदानमहो
शीलमहोधैर्यमहोक्षमा अहोसत्यमहोज्ञानंहरिश्चंद्रस्यधीमतः १८ शैब्या श्रुत्वा सश्लाघं अंणोकोदाणिंएसोअज्ज-
उत्तस्सगुणसलाहाएहिअअंमेसमास्सासेदि अहवाअलंगुणकधाएअज्जउत्तोजादिणामइमंअवत्थंतरंअणुभोदिति सब्ब
धाअआरणो धम्मोअरण्ण रुदिदंसव्वंअंधआरणच्चिदंसव्वंविण्णाणं, ततःप्रविशति धर्मः महापतिव्रतेमहाराजहरिश्चंद्रकथ
महमकारणोनाम तथाहि पश्य अन्येषांयेदुर्लभाः पार्थिवानांसत्यैर्दानैरूर्जितैःकर्मभिश्च तानेवाहंब्रह्मलोक्यस्यपूतान्
प्राप्तोदातुंशाश्वतानद्यलोकान् १९ तदलंविषादेन वत्सरोहिताश्वसमाश्वसिहि२ राजा दृष्ट्वा सहर्षं कथंभगवान्

अहंतेउपनयिष्यामि, १ कथंचक्रवर्तिलक्षणसनाथोप्ययंपाणिरस्यव्यापारस्योपनीतः, २ कथंआर्यपुत्रः हा आर्यपुत्रपरित्रायस्वपरित्रायस्व, ३ किमेतत्, ४ अन्यः कइदानीमेषआर्यपुत्रस्यगुणश्लाघया हृदयंमेसमाश्वासयति अथवाअलंगुणकथयाआर्यपुत्रोयादृशामेतदवस्थांतर-मनुभवति इतिसर्वथाअकारणोधर्मोरण्यरुदितंसर्वंअंधकारनर्तितंसर्वंविज्ञानम्,

For Private and Personal Use Only

धर्मः भगवन्प्रणमामि शैब्या भंअवंपणमामि रोहिताश्वः शनैःशनैरुन्मीलयति धर्मः समाश्वसिहिवत्सत्वंपित्राधर्मेणपा
लितः गतप्रत्यागतैः प्राणैश्चिरंपालयितुंप्रजाः २० रोहिताश्वःसहसोत्थाय कथमंबा नत्केनपुनरिमं देशमानीतासि शै-
ब्या जीदअत्तणोभाअधेएहिं, धर्मः वत्सायंब्रह्मलोकातिथिः पितापुरतएव रोहिताश्वः तातपरित्रायस्व२इत्यात्मानंपात-
यति राजा उपसृत्यनमांश्वपाकदास्यदूषितंस्प्रष्टुमर्हसि धर्मः राजन्नलमिदानींकृपणालापैः तथाहि केतायोस्याब्राह्मण
स्तेसदारोयश्चंडालोयत्रराज्यंचनत्ते राजन्गृह्यतांतत्वतोज्ञातुमेतद्दिव्यंचक्षुःसांप्रतंतेददामि २१ कःकोत्रपरिचारकाणांवि-
मानं२ प्रविश्य पुरुषः आज्ञापयतुधर्मोभगवान् धर्मः इतोभव पुरुषः एषोऽस्मि धर्मः महाराजविमानमधिरुह्यादिव्ये-
नचक्षुषाविलोक्यतां यथेदंसर्वमिति राजा यथादिशतिभगवानितिदिव्यंविमानमारुह्यरुच्चैर्वैषमास्थायध्याननाटयन्
धिक्प्रमादः२ विद्योपस्थानपरितोषिनेनभगवताकौशिकेनसाचिवेषुनोराज्यंप्रतिमुक्तं धर्मः राजन्भवत्सत्यजिज्ञासयै-
वासौमुनिस्तथाकृतवान् नतुराज्यार्थिनयातदलंसंभ्रमेण विशुद्धमालोक्यतांतदिदंसर्वं राजा पुनर्ध्याननाटयित्वा सस्मि
तं देविदिष्ट्यावर्धसे केतासतेप्रकृतिकारुणिकोद्विजन्माजायासखोनतुशिवोकिलदंपतीतौ केताममापिखलुयोभगवान्स
धर्मस्तेनाधुनामनसिशल्यमुपैतिशांतिम् २२ धर्मः तेनत्वाभिषिच्यतांपृथिवीराज्येवत्सोरोहिताश्वः राजा भगवन्यदादि
शसि धर्मः आसनं२ छत्रं२ चामरं२ भृंगारः२ पुरुषः एतत्सिंहासनमुपनतंदीप्तमाणिक्यचित्रंछत्रंचैतत्परिणतशरच्चंद्रबि-

१ भगवन्प्रणमामि २ आत्मनोभागधेयैः,

बानुकारि एतेज्योत्स्नाप्रसरधवलेचामरेहैमदंडेभृंगारोंभस्तादिदमभितः संभृतंसागरेभ्यः २३ धर्मः हरिश्चंद्रोरोहिताश्वस्या-
भिषेकंनाटयतः धर्मः ऊर्ध्वमवलोक्य दिष्ट्याविमानचारिणीभिर्देवताभिरभिनंद्यतेवत्सस्यरोहिताश्वस्याभिषेकमहोत्स-
वः तथाहि एतानद्योदधतिकलशान्संभृतांस्तीर्थतोयैः सांद्रःस्निग्धःस्थगयतिदिशोदुंदुभीनांनिनादः नृत्यंत्येताःसुरयुवतयो
मुक्तमंदारवर्षाः स्वैःस्वैरंशैर्नरपतिममीलोकपालाभजंते २४ तत्कृतंकरणीयमिदानींब्रह्मलोकमभिप्रतिष्ठस्व राजा भगवन्
कुर्द्वेतर्जननत्सरैरवलुगतान्दष्टाधरेकौशिकेनार्थेतान् कविहायगच्छसिनयास्मानप्यनाथानिति प्रत्यग्रागतबाष्पदीनवद
नैरुक्तोस्मियैस्तान्कथंत्यक्त्वात्मंभरिरस्मुपैमिभवतालोकान्प्रदिष्टानहं २५ धर्मः राजन्स्वकर्मवैचित्र्योच्चावचस्वभावानांप्र
जानांक्वपुनरेतावंतिभागधेयानि राजा क्षणांक्षणार्धसहनाभिरेवलोकान्प्रजाभिर्विहरामिनांस्तान् ममैववापुण्यलवेनैता
साभवंतुलोकाभवताप्रदिष्टाः २६ धर्मः सविस्मयं अहोलोकोत्तरंचरितमस्यराजर्षेः राजन्ननेननेपुण्यदानसंभाविनेनाप
रेणपुण्यसंभारेणप्रजानामात्मनश्चोपार्जिताः शाश्वतालोकाः तदुच्यतांकिंतेभूयःप्रियमुपकरोमि राजा भगवन्नतःपरमपि
प्रियमस्ति तथाहि विद्यालाभान्मुनिरपिमयित्यक्तमिथ्याभ्यसूयोलब्धःप्राणानयमपिशिशुश्चक्रवर्तित्वमाप्तः दृष्टःसाक्षा
त्वमपिभगवन्ब्रह्मसालोक्यमाप्तंकिंवानतस्याद्यदपरमतोयत्प्रियंप्रार्थयिष्ये २७ तथापीदमस्तु प्रमुदितसुजनासमृद्धस
स्याभवतुमहीविजयीचभूमिपालः कविभिरुपहितानिजप्रबंधेगुणकणिकाप्यनुगृह्यतांगुणज्ञैः २८ अपिच येनादि-
श्यप्रयोगंघनपुलकभृतानाटकस्यास्यहर्षाद्वस्त्रालंकारहेम्नांप्रतिदिनमकृशाराशयःसंप्रदत्ताः तस्यक्षत्रप्रसूतेर्भ्रमतुजग २२

द्धियंकार्तिकेयस्यकीर्तिः पारेक्षीराख्यसिंधोरपिकवियशसासार्धमग्रेसरेण २९ इतिनिष्क्रांताःसर्वे इतिश्रीआर्यक्षेमीश्वरकृतेचंडकौशिकनाटकेपंचमोंकः समाप्तिमगमत् ५ श्रीसीतारामचंद्रोजयतितराम्

॥ ॥ हेंपुस्तक मुंबईंत कृष्णाशास्त्री गुर्जर यांणीं आपल्या ॥

ग्रंथप्रकाशकछापखान्यांत

छापिलें शके

१७८३

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतिचंडकौशिकनाटकंसमाप्तम्

For Private and Personal Use Only